॥ श्रीजिनाय नमः ॥

# ॥ श्रीमल्लिनाथचरित्रं ॥

( कर्ता—श्रीशुभवर्धनगणि)

---

छपावी प्रसिद्ध करनार—पंडित श्रावक हीरालाल हंसराज ( जामनगरवाळा )

श्रीजैनभास्करोदय प्रिन्टिंग प्रेस—जामनगर.

सने १९३० किंमत ३-०-० संवत् १९८६

॥ श्रीजिनाय नमः ॥

॥ श्रीचारित्रविजयगुरुभ्यो नमः ॥

# ॥ अथ श्रीमल्लिनाथचरित्रं प्रारभ्यते ॥

( गूर्जरभाषांतरसहितं )

( मूळकर्ता-श्रीशुभवर्धनगणी )

( प्रथमः सर्गः )

भाषांतरकर्ता तथा छपावी प्रसिद्ध करनार-पंडित श्रावक हीरालाल हंसराज (जामनगरवाळा)

प्रत्यग्विदेहभूषा-कृदस्ति सलिलावतीमहाविजयः ॥ तस्मिन् विस्मितलोका । महापुरी वीतशोकाख्या १

अर्थः—पश्चिम महाविदेहक्षेत्रने शोभावनारो सलिलावतीनामे महाविजय छे, ते विजयमां आश्चर्यकारक शोभावाळी वीतशोकानामनी म्होटी नगरी छे. ॥ १ ॥

बलनृपतिस्तत्र बली । शत्रुबलाक्रमणकारिदोर्युगलः ॥ तस्य सहस्रं कांताः । श्रीकांता धारिणीमुख्याः २

अर्थः—ते नगरमां बलवान्, तथा शत्रुओना सैन्यने हंफावनारा बन्ने हाथवाळो बलनामे राजा हतो, अने ते राजाने मनोहर शोभावाळी धारिणीआदिक एक हजार स्त्रीओ हती. ॥ २ ॥

प्रासूतान्येद्युरियं । सिंहस्वप्नेन सूचितं तनयं ॥ मुदितेन चक्रिरे निज—सुतजन्ममहोत्सवा राज्ञा ३

अर्थः—एक दिवसे ते धारिणीराणीए सिंहस्वप्नथी सूचित थयेला पुत्रने जन्म आप्यो, त्यारे खुशी थयेला राजाए पोताना ते पुत्रना जन्मोत्सवो कर्या. ॥ ३ ॥

द्वादशदिवसे विविधै–र्महोत्सवैः स्वजनतोषणं कृत्वा ॥ स्वसुतस्य तदा चक्रे । भूपेन महाबलेत्याख्या ४

अर्थः–पछी बारमे दिवसे नानाप्रकारना महोत्सवपूर्वक स्वजनोने संतोषीने राजाए पोताना ते पुत्रनुं "महाबल" नाम पाडयुं.

धात्रीभिः पंचभिरथ । संवर्धितः क्रमसमाप्तसकलकलः ॥ कुमरस्तरुणीचेत—स्तुष्टिकरं यौवनं प्राप ५

अर्थः—पछी पांच धावमाताओवडे पोषण करातो, तथा अनुक्रमे सर्व कलाओ मेळव्याबाद ते महाबल कुमार युवतीस्त्रीओना हृदयने आनंद करनारुं यौवनवय पाम्यो. ॥ ५ ॥



कमलश्रीप्रमुखा नृप–पुत्र्यः परिणायितास्ततः पित्रा ॥ पंचशतीप्रमिता । धनपूर्णानि ददौ गृहाणि नृपः ६

अर्थः—पछी पिताए तेने कमलश्रीआदिक पांचसो राजपुत्रीओ परणावी, तथा धनथी भरेला महेलो (रहेवामाटे) आप्या.

**पंचशतीप्रमिताभिः । कांताभिः सह महाबलः कुमरः ॥ भुंजन् भोगसुखर्धिं । सौधे स्वेऽथाध्युवास मुदा ७**

अर्थः—एरीते ते पांचसो स्त्रीओसाथे भोगसुखनी समृद्धिने भोगवतो एवो ते महाबल कुमार आनंदपूर्वक पोताना मेहेलमां रहेवा लाग्यो. ॥ ७ ॥

**अन्येद्युस्तस्यां पुरि । समागताः स्थविरसाधवः केऽपि ॥ उद्यानमिंद्रकुंभा-भिधं च विद्योरुचरणधराः ८**

अर्थः—एक दिवसे ते नगरमां ज्ञानसहित मनोहर चारित्रने धारण करनारा केटलाक स्थविर मुनिओ इंद्रकुंभनामना उद्यानमां पधार्या. ॥ ८ ॥

**बलभूपतिस्ततोऽसौ । गत्वोद्याने प्रणम्य गुरुपादान् ॥ शिवशर्मकरीममलां । सुदेशनां किल शृणोतिस्म ९**

अर्थः—पछी ते बलराजाए ते उद्यानमां जइने. तथा ते गुरुमहाराजोना चरणोमां नमस्कार करीने मोक्षसुख करनारी निर्मल धर्मदेशना सांभळी. ॥ ९ ॥

**वैराग्यभावभावित-चित्तः सुगुरून् प्रणम्य भूमिपतिः ॥ गत्वा पुरीं स्वराज्ये । न्ययुंक्त महाबलकुमारेंद्रं १०**

अर्थः—पछी वैराग्यभावथी वासित थयेला हृदयवाळा ते राजाए ते सुगुरुओने वांदीने, तथा नगरमां जइने ते महाबल कुमारेंद्रने पोताना राज्यपर स्थापन कर्यो. ॥ १० ॥

स्थविराणां तेषां स्वय—मादीद्दीक्षामथांतिके राजा ॥ अध्यैष्ट बलमुनीशः । क्रमात् किलैकादशांगानि ११

अर्थः—पछी ते राजाए पोते ते स्थविर मुनिओपासे दीक्षा लीधी; तथा पछी अनुक्रमे ते बलराजर्षिए खरेखर अग्यारे अंगोनो अभ्यास कर्यो. ॥ ११ ॥

परिपाल्य चिरं चरणं । विदूषणं चारुनाम्नि शैलवरे ॥ मासोपवासतः स्वं । संलिख्य शिवं ययौ स मुनिः १२

अर्थः—पछी घणा काळसुधी निर्दोष चारित्र पाळीने चारुनामना उत्तम पर्वतपर पोते एक मासना उपवासपूर्वक संलेखना करीने ते बलमुनि मोक्षे गया. ॥ १२ ॥

श्रीमन्महाबलोर्वी—पतेस्ततो भुंजतो निजं राज्यं ॥ सिंहस्वप्नादासी—द्देव्यां कमलश्रियां पुत्रः १३

अर्थः—पछी पोतानुं राज्य भोगवता एवा ते महाबलराजानी कमलश्रीनामनी राणीनी कुक्षिए सिंह स्वप्नथी सूचित थयेलो पुत्र थयो. ॥ १३ ॥

नाम्ना श्रीबलभद्रः । कुमरोऽजनि यौवनं गतः क्रमशः ॥ भूपस्यास्य षडेते । संजाता बाल्यतः सुहृदः १४

अर्थः—ते कुमारनुं श्रीबलभद्र नाम पाडवामां आव्युं, तथा अनुक्रमे ते यौवनवय पाम्यो. वळी ते राजाना बाल्यपणाथीज नीचे जणाव्यामुजब छ मित्रो हता. ॥ १४ ॥

अचलो धरणः पूरण-नामा वसुसंज्ञकस्तथा श्रीमान् ॥ अभिचंद्रो वैश्रमणो । नाम्ना प्रौढर्द्धिसंयुक्तः १५

अर्थः—अचल, धरण, पूरण, तथा श्रीमान वसु, अभिचंद्र तथा प्रौढ समृद्धिवाळो वैश्रमण, एरीतना नामोवाळा तेना छ मित्रो हता. ॥ १५ ॥

एकत्मभिरिव साकं । भूपतिरेकत्व नूनमेभिरयं ॥ भोजनविविधस्थान—क्रीडाद्याः संततं चक्रे १६

अर्थः—जाणे खरेखर एकज जीववाळा होय नही ! एवा ते छए मित्रोनीसाथे ते राजा मळीनेज हमेशां भोजन, तथा भिन्न भिन्न स्थानोमां क्रीडाआदिक करतो हतो. ॥ १६ ॥

एवं समग्रं सुषमा—कलिते काले प्रयाति चान्येद्युः ॥ विहरंतस्तत्रापुः । केऽपि स्थविरा मुनि प्रवराः १७

अर्थः—एरीते (तेओनो) समग्र समय सुखे समाधे जातेछते एक दिवसे त्यां केटलाक स्थविर मुनिवरो विहार करताथका पधार्या. ॥ १७ ॥

तेषामुपदेशामृत—मास्वाद्याकंठमादराद्दीक्षां ॥ आकांक्षद्थादातुं । महाबलः प्रवरभावबलः १८

अर्थः—त्यारे तेओना उपदेशरूपी अमृतने आदरपूर्वक छेक कंठसुधी पीने, उत्तम भावरूपी सामर्थ्यवाळो ते महाबलराजाए दीक्षा लेवानी इच्छा करी. ॥ १८ ॥

मुनिमानम्य पुरीं स्वा-मभ्येत्य मित्राणि तानि कथयति च ॥ भो पूर्वजक्रमात्तां । लास्यामो वयमथो दीक्षां १९

अर्थः—पछी ते राजा ते मुनिराजने वांदीने, तथा पोताना नगरमां आवीने ते मित्रोने कहेवा लाग्या के, पूर्वजोना अनुक्रमथी प्राप्त थयेली दीक्षाने अमो ग्रहण करीशुं. ॥ १९ ॥

यूयं सुहृदः कथयत। निजाशयं ननु गृहीष्यथ तपस्यां ॥ प्रोचुस्ते चरणं वय–मादास्यामस्त्वया साकं २०

अर्थः—हे मित्रो! तमो तमारो विचार कहो? शुं तमो पण दीक्षा लेशो? त्यारे तेओए कह्युं के, अमो पण तमारी साथेज दीक्षा लेइशुं. ॥ २० ॥

तानथ भूपः प्रोचे। यशस्विनः सुकृतिनोऽथ यूयं भोः ॥ यात निजं निजमोकः। पर्यवसापयत निजबंधून् २१

अर्थः—त्यारे राजाए तेओने कह्युं के, हे मित्रो! तमो (खरेखर) यशस्वी तथा पुण्यशाली छो, माटे पोतपोताने घेर जइने तमो तमारा बंधुवर्गने समजावो? ॥ २१ ॥

स्वकुटुंबस्य ज्येष्ठे । पुत्रे भारं द्रुतं समारोप्य ॥ अत्रायांतु भवंत । सुखासनैश्चरणमादातुं २२

अर्थः—तथा तमारा कुटुंबनो भार म्होटा पुत्रने सोंपीने तुरत चारित्र लेवामाटे सुखासनोमां बेसीने तमो अहीं आवो?

तानेवं संभाष्य च। बलभद्रं निजसुतं गुणश्रेष्ठं ॥ राज्येऽभिषिच्य सज्जो। महाबलः स्वयमभूद्भूपः २३

अर्थः—तेओने एम कहीने, तथा गुणोथी श्रेष्ठ एवा पोताना पुत्र बलभद्रनो राज्यपर अभिषेक करीने ते महाभद्रराजा पोते तैयार थया. ॥ २३ ॥

तेऽपि प्रापुरथासौ। तैः सह शिबिकां सहस्त्रनरवाह्यां ॥ आरुह्य वाद्यनिनदै–र्मुखरीकृतदिङ्मुखः क्षितिपः २४
उल्लंघ्य पुरीमागा–दुद्यानं सोत्सवं प्रमुदितात्मा ॥ स्थविरांतिके समागा–ल्लुलुस्तपस्यां च सर्वेऽपि २५

अर्थः—पछी ते छए मित्रो पण आवी पहोंच्या, अने तेओनीसाथे एकहजार पुरुषोए उंचकेली पालखीमां बेसीने, वाजित्रोना शब्दोथी दिशाओने गजावतो एवो ते राजा, ॥ २४ ॥ नगरीने उल्लंघीने उत्सवसहित आनंदपूर्वक ते उद्यानमां आव्यो, तथा पछी तेओ सर्वेए ते स्थविरमुनिओ पासे दीक्षा लीधी. ॥ २५ ॥ युग्मं ॥

अंगान्यधीत्य सप्ता–प्येकादश ते मुनीश्वरा विधिना ॥ जाता बहुश्रुताः किल। परस्परं धर्मरागभृतः २६

अर्थः—पछी ते साते मुनिराजो विधिपूर्वक अग्यारे अंगोनो अभ्यास करीने, परस्पर खरेखर धर्मरागने धारण करताथका बहुश्रुतो थया. ॥ २६ ॥

यः षष्ठाष्टमदशमा–दिकमेकस्त्विह तनोति घोरतपः ॥ तत्कर्तव्यमथान्यै–रिति संधामीषु चास्ति मिथः २७

अर्थः—आपणामांथी जे कोइ एक मुनि अहीं छट्ठ, अट्ठम के दशमआदिक तीव्र तप करे. तेज तप बीजाओए पण करवो, एवी तेओए परस्पर प्रतिज्ञा करी. ॥ २७ ॥

दध्यौ तेषु गरिष्ठो । महाबलः शमसुधांबुधिश्चित्ते ॥ तपसस्तुल्यात्तुल्या । नःख्यातिर्भाविनी भुवने २८

अर्थ:—ते मुनिओमांथी म्होटा, तथा शांतरसरूपी अमृतना महासागरसरखा, महाबलमुनिराजे पोताना मनमां एम विचार्युं के, तुल्य तप करवाथी तो अमारी प्रख्याति जगतमां सरखीज थशे. ॥ २८ ॥

मुख्याऽमुख्यविभेदः। सर्वैरवबुध्यते न चास्मासु ॥ एभ्यस्तपोधनेभ्य—स्तपोऽधिकं तद्वयं कुर्मः २९

अर्थ:—अने तेथी अमारामांथी म्होटा न्हानानो भेद सर्व कोइ जाणी शकशे नही, माटे आ बीजा तपस्वी मुनिओथी हुं अधिक तप करुं. ॥ २९ ॥

लोके निजप्रशंसा—कृते ततोऽधिकमतापि तेन तपः ॥ दांतेंद्रियेण धिग् धिग्। महतामपि भवति खलु मोहः

अर्थ:—एरीते दुनीयामां फक्त पोतानी प्रशंसा करावबामाटे, इंद्रियोने वश राखनारा एवा पण ते महाबल मुनिराजे ते मुनिराजोथी अधिक तप कर्यो, अरे! धिक्कार छे! धिक्कार छे! के तेवा महान् मुनिराजोने पण आवो मोह उत्पन्न थाय छे. ॥३०॥

अति निर्मलेऽपि चरणे। सम्यग् शिवसौख्यसाधके सततं ॥ तस्य महाबलशमिनो। बभूव माया खलु कलंकः

अर्थः—ए रीतें हमेशां मोक्षसुख साधनारुं अति निर्मल चारित्र पालतांथकां पण ते महाबल मुनिराजना संबंधमां खरेखर ते कपटरूपी कलंक उत्पन्न थयुं. ॥ ३१ ॥

विज्ञातसार्वसर्वा—गमोऽपि ममतोज्झितः स राजर्षिः ॥ स्त्रीनामकर्म माया—तपोविधानाद् बबंध तदा ३२

अर्थः—सर्वज्ञ प्रभुना सर्व आगमोना जाणकार, तथा ममत्वविनाना एवा पण ते महाबलराजर्षिए ते वखते कपटयुक्त तप करवाथी स्त्रीनामकर्म बांध्युं. ॥ ३२ ॥

**तीर्थकरभक्तिमुख्यै—विंशत्या स्थानकैः स्पृष्टैः ॥ जिननामकर्म बद्धं । तेन महाबलमुनींद्रेण ३३**

अर्थः—एरीते ते महाबलमुनिराजे तीर्थंकरप्रभुनीभक्ति आदिक वीस स्थानको आराधीने जिननामकर्म बांध्युं. ॥ ३३ ॥

**साधूनामाराध्याः । प्रतिमा द्वादशविनिर्मिताः क्रमतः ॥ तैः सप्तभिर्मुनींद्रै—र्गुप्तित्रयसमितिपंचरतैः ३४**

अर्थः—पछी ते साते मुनिराजोए त्रणे गुप्तिओ तथा पांचे समितिओमां लीन रहीने साधुओने आराधवानी बारे प्रतिमाओने अनुक्रमे आराधी. ॥ ३४ ॥

**आरुह्य चारु चरणा—चरणपराः स्थंडिलानि संशोध्य ॥ भेजुः शिलातलानि । क्षिप्रं संलेखनानिरताः ३५**

अर्थः—पछी चारित्राचारमां तत्पर थयेला ते साते मुनिओ चारुपर्वतपर चडीने, तथा त्यां निर्दोष शिलातलोने पोंजीने तुरत तेपर संलेखनामां रक्त थइने, अर्थात् अनशन करीने स्थिर रह्या. ॥ ३५ ॥

**प्रतिपाल्य मासयुगली—मनशनमिह ते तपोधनाः सर्वे ॥ सुरसदसि जयंताख्ये । ह्यनुत्तरे सुरवरा जाताः ३६**

अर्थः—पछी ते सघळा तपस्वी मुनिओ त्यां बे माससुधीनुं अनशन पालीने अनुत्तरविमानमां जयंतनामनी देवसभामां उत्तम देवपणे उत्पन्न थया. ॥ ३६ ॥

द्व्यधिकत्रिंशत्सागर–मितमायुः श्रीमहाबलसुरस्य ॥ पूर्णं शेष सुराणां। षण्णां न्यूनं च किंचिदिह ३७

अर्थः—त्यां श्रीमहाबलदेवनुं आयु संपूर्ण बत्रीस सागरोपमोनुं हतुं, अने बाकीना छ देवोनुं आयु तेथी कंइंक ओछुं हतुं.

षडपि सुरास्ते मुक्त्वा। महाबलं सुरवरं ततश्च्युत्वा ॥ स्वायुः क्षयेऽथ जंबू–द्वीपगभरते पृथग् जाताः ३८

अर्थः—पछी ते महाबलनामना उत्तम देवने छोडीने, ते छए देवो पोतपोतानुं आयु क्षीण थयाबाद त्यांथी चवीने जंबूद्वीपमां आवेला भरतक्षेत्रमां भिन्न भिन्न जगोए उत्पन्न थया. ॥ ३८ ॥

अन्यान्यमेदिनीपति–कुलेषु चोत्पद्य ऋद्धिमत्सु ततः ॥ प्राप्ता यौवनभावं। साम्राज्यश्रीयुजः सर्वे ३९

अर्थः—एरीते समृद्धिवाळा जूदाजूदा राजकुटुंबोमां उत्पन्न थइने पछी तेओ सघळा साम्राज्यनी लक्ष्मीयुक्त थयाथका यौवन वय पाम्या. ॥ ३९ ॥

एकः प्रतिबुद्धिरिति। ख्यातः श्रीकोशलापुरीनाथः ॥ चंद्रच्छायस्त्वपर—स्तथैव रंगापुरीभर्ता ४०

अर्थः—तेओमांथी एक श्रीकोशलापुरीनो स्वामी प्रतिबुद्धिनामथी प्रख्यात थयो, अने एवीजरीते बीजो रंगापुरीनो स्वामी चंद्रच्छायनामे राजा थयो. ॥ ४० ॥



शंखः काशीनृपति—स्तथा तृतीयः सुशंखशुक्लयशाः ॥ रुक्मीति नृपाधीशः। कुणालदेशाधिपस्तुर्यः ४१

अर्थः—त्रीजो उत्तम शंखसरखा उज्ज्वल यशवाळो शंखनामे काशीदेशनो राजा थयो, तथा चोथो राजाओमां अग्रेसर रुक्मी-नामे कुणालदेशनो राजा थयो. ॥ ४१ ॥

कुरुषु त्वदीनशत्रु—र्विख्यातः पंचमः पतिः पृथ्व्याः ॥ जितशत्रुः सत्याह्वः । षष्ठः पंचालदेशविभुः ४२

अर्थः—पांचमो कुरुदेशमां अदीनशत्रुनामे प्रख्यात पृथ्वीपति थयो, अने छट्ठो सत्यनामवाळो जितशत्रुनामे पंचाल देशनो राजा थयो. ॥ ४२ ॥

प्राज्यानि राज्यानि विशाल ऋध्ध्या । ऋद्धानि नीत्या परिपालयंतः ।
षडप्यमी भूपतयः सुखं स्व—र्निवासिकल्पं सुकृतैरवापुः ॥ ४३ ॥

अर्थः—विशाल वैभवथी समृद्धियुक्त थयेलां मनोहर राज्योने पालता, एवा आ छए राजाओ पुण्योवडे करीने देवसरखुं सुख पाम्या. ॥ ४३ ॥

॥ इति श्रीमल्लिनाथचरित्रे पूर्वभवस्वरूपवर्णनो नाम प्रथमः सर्गः समाप्तः ॥ श्रीरस्तु ॥

## ॥ अथ द्वितीयः सर्गः प्रारभ्यते ॥

पूर्वभवषड्वयस्य–क्षितिपतिदुर्गस्थितोऽपि पंचशरः ॥ येनैकशरेण जितः । सुभटोऽव्याद्वः स मल्लिजिनः १

अर्थः—पूर्वभवना छ मित्रराजाओरूपी किल्लामां रहेला एवा पण पंचशर एटले कामदेवने जेमणे एकज बाणथी जीतेलो छे, एवा ते श्रीमल्लिनाथ जिनेश्वररूपी सुभट तमारुं रक्षण करो ? ॥ १ ॥

जंबूद्वीपगतश्री—भरतार्धदक्षिणे समस्ति पुरी ॥ मिथिला नाम्ना धाम्ना । स्वर्गपुरीसंनिभा गृहिणां ॥ २ ॥

अर्थः–जंबूद्वीपमां आवेला दक्षिणतरफना भरतार्धमां शोभावडे करीने गृहस्थोनेमाटे देवनगरीसरखी मिथिला नामनी नगरी छे.

त्रिभुवनविख्यातयशाः ॥ श्रीकुंभः शंभुसन्निभः शक्त्या ॥ राज्यं भुनक्ति भूप–स्तत्र श्रीवल्लिवनसुरभिः ३

अर्थः—ते नगरमां त्रणे जगतमां मख्यात यशवाळो, तथा शक्तिवडे महादेवसरखो, अने लक्ष्मीरूपी वेलडीओना वनने नवपल्लव करवामां वसंतऋतुसरखो कुंभनामे राजा राज्य करे छे. ॥ ३ ॥

तस्य प्रभावतीति । प्रभावती विद्धती सतीभावं ॥ अंतःपुरीषु मुख्या । बभूव दयिता दयोपेता ॥४ ॥

अर्थः—ते राजानी कांतिवाळी, तथा सतीपणुं धारण करनारी, सर्व राणीओमां मुख्य, अने दयाळु हृदयवाळी मभावतीनामनी राणी हती. ॥ ४ ॥

स महाबलामरोऽपि हि। निजायुरापूर्य निरवधेरवधेः ॥ मत्वा च्युतिं विमाना–दस्मादनुभूतभूरिसुखः ५
चैत्रस्य सितचतुर्थ्यां। निशाकरेऽप्यश्विनीयुते राज्ञ्याः ॥ तस्याः कुक्षावागा–दुध्धृत्य जयंतसुविमानात् ६

अर्थः—हवे ते महाबलदेव पण खरेखर पोतानुं आयुपूर्ण करीने, पोताना निःसीम अवधिज्ञानथी पोतानुं च्यवन थनारुं जाणीने, घणुं सुख भोगव्याबाद, ते जयंत विमानमांथी उद्धरीने, चैतरसुद चोथने दिवसे, अश्विनीनक्षत्रसाथे चंद्रनो योग होते छते ते प्रभावती राणीनी कुक्षिमां अवतर्या. ॥ ५ ॥ ६ ॥ युग्मं ॥

स्वप्नांश्चतुर्दशेयं। ददर्श राज्ञी प्रभावती व्यक्तान् ॥ निद्रामुक्तास्मार्षी–देतान् स्वप्नान् क्रमेण ततः ७

अर्थः—पछी ते प्रभावतीराणीए प्रगट रीते चौद स्वप्नो जोयां, त्यारबाद निद्रारहित थइने ते अनुक्रमे ते स्वप्नोनुं स्मरण करवा लागी. ॥ ७ ॥

उदिते सहस्रभानौ। स्वपतिं पृष्टुं प्रकृष्टफलमेषां ॥ हंसीव नृपसमीपं। जगाम सद्यस्ततो राज्ञी ॥ ८ ॥

अर्थः–पछी सूर्योदय थयाबाद ते राणी पोताना स्वामीने ते स्वप्नोनुं उत्कृष्ट फल पूछवामाटे हंसीनीपेठे तुरत राजापासे गइ.

राजानं जय विजय–स्वेति वचोभिर्व्यबोधयद्राज्ञी ॥ भद्रासने निविष्ठा। तदाज्ञया तदनु विज्ञवरा ९

अर्थः—पछी ते राणीए "आप जय पामो ? विजय पामो ?" एवां वचनोथी राजाने जगाड्या, तथा तेवारपछी ते विचक्षण राणी तेमनी आज्ञाथी भद्रासनपर बेठी. ॥ ९ ॥

आगतिहेतौ पृष्टे । भूपालेनाथ तत्र नृपपत्नी ॥ क्रमशश्चतुर्दशैता—नेवाकथयन् महास्वप्नान् ॥ १० ॥

अर्थः—पछी राजाए त्यां आववानुं कारण पूछवाथी राणीए अनुक्रमे ते चौदे महान् स्वप्नो तेमने कही संभळाव्यां ॥१०॥

संयोज्यांजलिमेषा । प्रभावती विज्ञपयति निजकपतिं ॥ स्वामिन्नेतेषां मम । स्वप्नानामादिश विचारं ११

अर्थः—पछी ते प्रभावतीराणीए हाथ जोडीने पोताना स्वामीने विनंति करीके, हे स्वामी! मारां आ स्वप्नोनां फलनुं स्वरूप मने कही संभळावो? ॥ ११ ॥

स्वप्नानेतान्नेता । भुवोऽवधार्याखिलान् विचार्य हृदि ॥ प्राह प्रिये प्रशस्याः । स्वप्ना एते महाफलदाः १२

अर्थः—पछी ते भूमिपति ते सघळां स्वप्नोने ध्यानमां लेइने, तथा मनमां विचारीने बोल्यो के. हे प्रिये! आ स्वप्नो प्रशंसा करवालायक तथा महान् फल देनारां छे. ॥ १२ ॥

फलमेषां प्रासंगिक—मर्थामितभोगराज्यसौख्यादि ॥ मुख्यं फलं ह्यमीषां । शृणु भद्रे सांद्रभद्रकरं ॥१३॥

अर्थः—द्रव्य, प्रमाणविनाना भोगो, राज्य, तथा सुखआदिकरूप आ स्वप्नोनुं प्रासंगिक फल छे. तथा आ स्वप्नोनुं विशाल कल्याण करनारुं जे खरेखरुं मुख्य फल छे, ते फल हे भद्रे! तुं सांभळ? ॥ १३ ॥

सार्धाष्टदिनयुतेषु च । नवमास्सु गतेषु शुभवती भवती ॥ प्रसविष्यति सुतरत्नं । स्वकुलालंकरणतिलकनिभं

अर्थः—साडाआठ दिवसोसहित नव मास गयाबाद भाग्यशाली एवी तुं, आपणा कुलने शोभाववामां तिलकसरखा पुत्ररत्नने तुं जन्म आपीश. ॥ १४ ॥

**बाल्यावस्थां मुक्त्वा । यौवनभावं गतः स तव पुत्रः ॥ भविताद्भुतबलगुणवान् । भूपीठे सार्वभौमनृपः**

अर्थः—बाल्य अवस्था उल्लंध्याबाद यौवनवय पामेलो एवो ते तारो पुत्र पृथ्वीपर अद्भुत बल अने गुणोवाळो चक्रवर्ती राजा थशे. ॥ १५ ॥

**संपूर्णसोमवदना। जगाविति क्षितिपवल्लभा हृष्टा॥ प्राणप्रिय भवतोदित–मवितथमेवास्तु किल सफलं**

अर्थः—पछी संपूर्ण चंद्रसरखा मुखवाळी ते राणीए आनंद पामीने एम कह्युं के, हे प्राणप्रिय! आपे कहेलुं वचन खरेखर सत्य अने सफल थाओ ? ॥ १६ ॥

**भूवल्लभेन साकं। भुक्त्वा भोगानवाप्य तदनुमतिं॥ गत्वा स्वावासं सा । त्वचीकरद्धर्मजागरिकां ॥१७॥**

अर्थः—पछी राजासाथे भोगो भोगवीने, तथा तेमनी अनुज्ञा लेइने, ते प्रभावतीराणी पोताना आवासमां आवीने धर्मकथाओवडे जागरण करवा लागी. ॥ १७ ॥

**प्राभातिकीं क्रियामथ । कृत्वा प्रातर्नराधिपः कुंभः ॥ सामंतनृपैः साकं । व्यभूषयत्पर्षदं हर्षात् ॥ १८ ॥**

अर्थः—पछी ते कुंभराजा प्रभातमां प्रभातकाळसंबंधी नित्यकार्य करीने सामंतराजाओसहित हर्षपूर्वक राजसभाने शोभाववा लाग्यो. ॥ १८ ॥

पुरुषैरादेशकरै—राहूय स्वप्नवेदिनः पुरुषान् ॥ पप्रच्छ स्वप्नफलं । नृपतिः फलपूर्णपाणिरथ ॥ १९ ॥

अर्थः—पछी ते राजा हुकम बजावनारा पुरुषोमारफते स्वप्नफलजाणनारा पुरुषोने बोलावीने, तथा फलोवडे पोताना बन्ने हाथ संपूर्ण भरीने तेओने ते स्वप्नोनुं फल पूछवा लाग्यो. ॥ १९ ॥

तैरेवमवादि मुदा । हृदा विचार्येतरेतरं क्रमतः ॥ भाग्येनैते स्वप्ना । नूनं लभ्याः समग्रेण ॥ २० ॥

अर्थः—त्यारे ते स्वप्नपाठकोए अनुक्रमे परस्पर मांहोमांहे मनमां विचार करीने हर्षथी एम कह्युं के, खरेखर संपूर्ण भाग्यथीज आ स्वप्नो मेळवी शकाय छे. ॥ २० ॥

स्वप्नानुभावतस्तत् । पूर्णे काले प्रभावती राज्ञी ॥ सुतमेकं प्रजनिष्यति । सकलगुणविभूषितं लोके २१

अर्थः—माटे आ स्वप्नोना प्रभावथी संपूर्ण समये प्रभावतीराणी, जगतमां सर्व गुणोथी विभूषित थयेला एक पुत्रने जन्म आपशे. ॥ २१ ॥

श्रुत्वा हृष्टो राजा । भूरिवस्त्रा भूषणादिदानेन ॥ संतोष्यैतान्सर्वान् । विससर्ज द्रुतं च स्वप्नविदः २२

अर्थः—ते सांभळी खुशी थयेला ते राजाए तुरतज ते सघळा स्वप्नपाठकोने घणां वस्त्रो तथा आभूषणोआदिकना दानथी संतोषीने विसर्जन कर्या. ॥ २२ ॥

राज्ञ्यास्तृतीयेमासे । संपूर्णे समुदपद्यताऽनिंद्यः ॥ एवंरूपः सकल—श्रीहेतुर्दोहदः सुखदः ॥ २३ ॥

अर्थः—पछी त्रीजो मास संपूर्ण थयाबाद ते राणीने नीचे जणाव्या मुजब सर्व लक्ष्मीना कारणरूप, प्रशंसा करवा लायक, तथा सुखकारी दोहलो उत्पन्न थयो. ॥ २३ ॥

सुगंधिभिः पंचवर्णै—र्जलजैः स्थलजैः सुमैः ॥ पल्यंकेऽतुल्यमूल्ये स—न्माल्यैराच्छादिते भृशं ॥ २४ ॥

जातीचंपकपाटल—पुन्नागा शोकमल्लिकादीनां ॥ कुसुमैर्दशार्धवर्णैः । श्रीदाम श्रीप्रदप्रचितं ॥ २५ ॥

तज्जिघ्रती पुनः पुन—रात्मसखीभिः समं निजेभवने ॥ स्वैरं विलसामि मुदा । स्वःस्त्रीवद्वरेण्यलावण्या २६

अर्थः—जलमां तथा जमीनपर उत्पन्न थयेलां पंचरंगी सुगंधि पुष्पोथी, तथा तेओनी गुंथेली उत्तम मालाओथी विशेष प्रकारे आच्छादित थयेला पलंगपर (बेसीने), ॥ २४ ॥ जाइ, चंपक, गुलाब, पुन्नाग, अशोक, तथा मालतीआदिक पंचरंगी पुष्पोवडे कुबेरे बनावेला गुच्छकने ॥ २५ ॥ वारंवार सुंघतीथकी, मारी सखीओसाथे हर्षपूर्वक देवांगनानीपेठे उत्तम लावण्ययुक्त थइथकी मारी इच्छामुजब आनंदक्रीडा करुं. ॥ २६ ॥ त्रिभिर्विशेषकं ॥

इत्यस्मिन् संजाते । सुदोहदे व्यंतरामराः सहसा ॥ श्रीकुंभभूपभवन—स्योर्ध्वं चक्रुर्घनाटोपं ॥ २७ ॥

अर्थः—एरीते ( ते प्रभावतीराणीने ) उत्तम दोहलो उत्पन्न थवाथी व्यंतरदेवोए तुरत ते कुंभराजाना मेहेलउपर वरसादनो आडंबर रच्यो. ॥ २७ ॥

पुष्पाणि दलानि ततो । ववृषुर्दिव्यानि तेऽमराश्च मुदा ॥ तत्सौरभेण भवनं । जातं तु सुगंधसंयुक्तं २८

अर्थः—पछी ते देवोए हर्षपूर्वक दिव्य पुष्पोनो तथा पत्रोनो वरसाद वरसाव्यो, अने तेनी सुगंधिथी ते राजभुवन सुगंधमय थइ गयुं. ॥ २८ ॥

तैर्दिव्यैः कुसुमौघै—राच्छादिते खलुदिव्य शयनीये ॥ देवीव सा निषण्णा । श्रीदामाजिघ्रती स्वैरं २९

अर्थः—ते दिव्य पुष्पोना समूहोथी आच्छादित करेली दिव्य शय्यामां पोतानी इच्छामुजब पुष्पोनो गुच्छक सुंघतीथकी ते प्रभावती राणी देवीनीपेठे बेठी. ॥ २९ ॥

तं दोहदमनवद्यं । प्रभावती पर्यपूरयत्प्रमदात् ॥ पुण्यवति गर्भगे सति । दुःसाध्यं किं भवेन्नूनं ॥३०॥

अर्थः—एरीते ते प्रभावतीराणीए आनंदथी पोतानो ते निर्दोष दोहलो संपूर्ण कर्यो. केमके पुण्यवान् जीव गर्भमां आव्येथी खरेखर शुं दुःसाध्य होइ शके ? ॥ ३० ॥

संपूर्णा शांतितो राज्ञी । जन्मकाले समागते ॥ मार्गशीर्षसितैकाद—श्यां तिथावश्विनीगते ॥ ३१ ॥

निशाकरे समस्ते च । निर्मले दिग्गणेऽपि च ॥ सुभिक्षसुंदरे भूमी—तले सुखकरेऽनिले ॥ ३२ ॥
तदा ग्रहेषु सर्वेषु । गतेषूच्चगृहाणि च ॥ एकोनविंशं तीर्थेशं । प्रसूतेस्म निलप्रभं ॥३३॥ त्रिभिर्विशेषकं ॥

अर्थः—पछी जन्मसमय आव्येथी शांतिथी भरेली ते राणीए मागसरसुद अग्यारसनी तिथिए, अश्विनीनक्षत्रसाथे चंद्रनो योग थये छते, तथा दिशाओनो सर्व समूह निर्मल थये छते, तथा पृथ्वीतलपर सुंदर सुकाळ व्याप्त थये छते, सुखकारी वायु वाये छते, अने सर्व ग्रहो उंच स्थानमां प्राप्त थये छते लीलमसरखी लीली कांतिवाळा ओगणीसमा तीर्थंकरप्रभुने जन्म आप्यो.

देहप्रभाभरोद्योति—वासावासं जिनेश्वरं ॥ कर्मणा च कनीरूपं । प्रसूता च प्रभावती ॥ ३४ ॥

अर्थः—शरीरनी कांतिना समूहथी तेजस्वी करेल छे राजमेहेल जेमणे, तथा कर्मयोगे कन्यास्वरूपने धरनारा एवा ते जिनेश्वरप्रभुने ते प्रभावती राणीए जन्म आप्यो. ॥ ३४ ॥

त्रैलोक्येऽप्यखिले सद्य । उद्योतो महानभूत् ॥ तथापुनर्नारकाः सर्वे । क्षणं सुखलवं तदा ॥ ३५ ॥

अर्थः—तुरतज समस्त त्रणे लोकमां महान उद्योत थयो, तथा ते समये सघला नारकीओ पण क्षणवारसुधी किंचित् सुख पाम्या ॥ ३५ ॥

आसनकंपाद्दत्तो—पयोगतोऽवगतजैनजन्मानः ॥ दिक्कन्याः षट्पंचा–शदेत्य तत्रामितानंदात् ॥ ३६ ॥

सापत्याया देव्या । व्यधुर्मुदा सूतिकर्म शर्मकरं ॥ इंद्रा अपि जन्ममहं । वितेनिरे तस्य तीर्थकृतः ॥३७॥

अर्थः—पछी आसन कंपवार्थी, तथा ज्ञानना उपयोग देवाथी तीर्थंकरप्रभुनो जन्म थयेलो जाणीने, अति आनंदथी छपन दिक्कुमारीओए त्यां आवीने अपत्यसहित प्रभुनी मातानुं सुखकारी प्रसूतिकार्य हर्षपूर्वक कर्युं, पछी इंद्रोए पण त्यां आवीने प्रभुनो जन्ममहोत्सव कर्यो. ॥ ३६ ॥ ३७ ॥ युग्मं ॥

मातृसमीपे मुक्त्वा । तीर्थकरं तं पुनः सुराधीशाः ॥ स्वरगुः कृत्वा द्वीपे-ऽष्टमे मुदाष्टाह्निकोरुमहं ॥ ३८ ॥

अर्थः—पछी ते श्रीतीर्थंकरप्रभुने मातापासे मूकीने ते इंद्रो आठमा नंदीश्वरद्वीपमां हर्षथी मनोहर अठ्ठाइमहोत्सव करीने देवलोकमां गया. ॥ ३८ ॥

श्रीकुंभभूपभवनो—परि धनदादेशकारकैस्त्रिदशैः ॥ बह्व्यः सुवर्णरत्ना-दिककोट्यो ववृषिरे च तदा ३९

अर्थः—ते वखते कुबेरनो हुकम उठावनारा देवोए कुंभराजाना मेहेलपर क्रोडोगमे सोनाम्होरोनी तथा रत्नोनी वृष्टि करी.

पुष्पैर्वासैश्चूर्णै-र्दलैस्तथा भूषणैः फलैर्विविधैः ॥ वृष्टिं प्रहृष्टचित्ता। व्यधुः सुधाजलदवत् त्रिदशाः ॥४०॥

अर्थः—वळी ते देवोए मनमां हर्ष पामीने अमृतना मेघनीपेठे पुष्पोनी, वासक्षेपनी, चूर्णोनी, पत्रोनी, आभूषणोनी तथा नानाप्रकारना फलोनी वृष्टि करी. ॥ ४० ॥

स्वसुताया जनिशुद्धि–प्रदातृवर्गाय भूपतिः कुंभः ॥ वांछाधिकसुवर्णा–दिकदानमदान्मुदा च तदा ४१

अर्थः—ते वखते ते कुंभराजाए पोतानी पुत्रीना जन्मनी वधामणी आपनार लोकोने, हर्षथी तेमनी इच्छाथी पण अधिक सुवर्णआदिकनुं दान आप्युं. ॥ ४१ ॥

विपुलां प्रीतिं माता–पित्रो स्तंतन्वते यथा सुसुतः ॥ विदधे ततोऽधिकामिय–मसमां प्रीतिं सुता तावत्

अर्थः—जेम उत्तम पुत्र मातापिताने अत्यंत प्रीति उपजावे छे, तेथी पण अधिक अने अतुल्य प्रीति ते पुत्रीए ते वखते (पोताना मातापिताने) उपजावी. ॥ ४२ ॥

नृपतिश्चारकशोधन–मकारयद्दंडपाशिकैः पुरुषैः ॥ प्रतिगोपुरं मणिमय–तोरणरचनां च चारुतरां ॥४३॥

अर्थः—पछी राजाए पोलीसना माणसो मारफते केदखानाओमांथी केदीओने छोडी मेलाव्या, तथा दरेक दरवाजे मणिओना तोरणो बांध्यां. ॥ ४३ ॥

उत्तंभितैश्चलैरल–ममितैर्वासोभरैरतिविशालैः ॥ विपणिश्रेणिविभूषां । सविलासामिव भृशंभव्या ॥४४॥

अर्थः—उंचे बांधेलां, तथा सारीरीते उडतां, अने अतिविशाल वस्त्रोना समूहोथी (पताकाओथी) जाणे विलास (नृत्य) वाळी थइ होय नही, एवी अतिमनोहर दुकानोनी श्रेणिनी पण शोभा करी. ॥ ४४ ॥

पदे पदेऽथ संगीत—गीतवाद्यमनोहरैः ॥ नाटकैर्विदधे राज—मार्गं च रुचिरं भृशं ॥ ४५ ॥

अर्थः—वळी पगले पगले संगीत तथा वाजित्रोथी मनोहर लागतां नाटकोवडे राजमार्गने अति मनोहर करवामां आव्यो.

वृध्ध्योत्तरयोत्तरया । महोत्सवानां मुदा सुदानपुषां ॥ नामस्थापनदिवसः । समागतः शोभनो दशमः

अर्थः—एरीते हर्षथी उत्तम दाननी पुष्टिवाळा महोत्सवोनी उत्तरोत्तर बुद्धिथी नाम पाडवानो दशमो शुभ दिवस आवी पहोंच्यो.

वस्त्रादिदानपूर्वं—भुक्त्वा निजबंधुभिः समं राजा ॥ श्रीकुंभः सविचारं । जगाविति प्रमुदितमनस्कः ॥४६॥

अर्थः—पछी ते कुंभराजाए वस्त्रोआदिकना दानपूर्वक पोताना कुटुंबिओसाथे भोजन करीने, तथा मनमां आनंद पामीने विचार करी एम कह्युं के, ॥ ४६ ॥

भोभोः स्वजनाः कन्या-रत्नेऽस्मिन् गर्भगे खलु जनन्याः ॥ शयितुं शयने माल्यैः। कलितेऽजनि दोहदः शुभदः

अर्थः—हे स्वजनो ! आ कन्यारत्न गर्भमां आव्याबाद खरेखर तेनी माताने पुष्पमालाओथी भरेली शय्यामां सुवानो कल्याणकारी दोहलो उत्पन्न थयो हतो. ॥ ४७ ॥

ततोऽसौ धन्यमूर्धन्या । कन्या मल्लीति जायतां ॥ ववृधे सा ततो बाला । यथा शशिकलांबरे ॥ ४८ ॥

अर्थः—माटे भाग्यशालीओमां शिरोमणि एवी आ कन्यानुं "मल्ली" एवुं नाम थाओ ? पछी आकाशमां रहेली चंद्रनीकला जेम वृद्धि पामे छे, तेम ते मल्लीबाला पण वृद्धि पामवा लागी. ॥ ४८ ॥

लाल्यमानां सदारंभा—भिः सा सौभाग्यभाजनं ॥ धार्यमाणां सदा स्वेंके । शचीभिः स्वः समेत्य च ॥४९॥
मूर्तिमतीं लक्ष्मीं वा । सरस्वतीं वा सुधामधुरवाणीं ॥ तामालोक्य भगवतीं । स्त्रीजातिं तुष्टुवुः सर्वे ॥५०॥

अर्थः—उत्तम तैयारीओवाळी इंद्राणीओए स्वर्गमांथी आवीने रमाडाती, तथा हमेशां पोताना खोळामां धारण कराती, अने सौभाग्यना भाजनरूप, देहधारीलक्ष्मी, अथवा अमृतसरखी मधुर वाणीवाळी जाणे सरस्वतीसरखी ते भगवती मल्लीकुमारीने जोइने सर्व लोको स्त्रीजातिनी प्रशंसा करवा लाग्या. ॥ ४९ ॥ ५० ॥ युग्मं ॥

बाल्यावस्थामतिक्रम्य । श्रीमल्लिर्यौवनं वयः ॥ क्रमादवाप विश्वाप—त्परिहारपरायणा ॥ ५१ ॥

अर्थः—जगतनी पीडाने दूर करवामां तत्पर थयेली एवी ते मल्लीकुमारी अनुक्रमे बाल्यअवस्था उल्लंघीने यौवनवयने प्राप्त थइ. ॥ ५१ ॥

भास्वन्मरकतरत्न—प्रियंगुनीलोत्पलांगरुचिनिचया ॥ सा दृष्टापि न केषां । दृग्नैर्मल्यं करोतिस्म ॥५२॥

अर्थः—चळकता नीलममणि, प्रियंगुवृक्ष तथा लीलां कमलसरखी शरीरनी कांतिना समूहवाळी ते मल्लीकुमारी कोनी आंखोने आनंद न उपजाववा लागी ? ॥ ५२ ॥

पंचविंशतिकोदंड—देहमाना मनोजभित् ॥ श्रीमल्लिरादधौ विश्व—जयिनीं रूपसंपदं ॥ ५३ ॥

अर्थः—पचीस धनुषोना शरीरप्रमाणवाळी, तथा कामदेवने भेदनारी ते मल्लीकुमारी जगतने जयकारी रूपसंपत्तिने प्राप्त थइ.

ज्ञानत्रितयावगता—खिल शास्त्रार्थ कदर्थितकुशास्त्रा ॥ ब्रह्मैवैषा सततं । ब्रह्मकलामादधाति कलां ॥५४॥

अर्थः—त्रण ज्ञानवडे करीने जाणेल छे सर्व शास्त्रोना अर्थो जेणीए, तथा खंडन करेल छे कुशास्त्रोनुं जेणीए, एवी ते मल्लीकुमारी हमेशां ब्रह्मानीपेठे मनोज्ञ ब्रह्मकलाने धारण करवा लागी. ॥ ५४ ॥

अवधिज्ञानात्प्राग्भव—मित्राणि षडप्यसौ स्वराज्यानि ॥ देशेषु तेष्वपश्यत् । कुर्वाणानींद्रवन्मुदिता ॥५५॥

अर्थः—पछी हर्षित थयेली मल्लीकुमारीए अवधिज्ञानथी पोताना पूर्वभवना छए मित्रोने ते ते देशोमां इंद्रनीपेठे पोतपोतानां राज्यो भोगवता जोया. ॥ ५५ ॥

अथ तत्प्रतिबोधकृते । मत्वानागतमुपायमवधिचिदा ॥ श्रीमल्लिरादिदेशा—खिलानिदं सूत्रधारवरान्

अर्थः—पछी ते राजाओने प्रतिबोधवामाटे, पोताना अवधिज्ञानथी भविष्यकाळनो उपाय ध्यानमां लेइने ते मल्लिकुमारीए सर्व सुतारोने ( एकठा करीने ) एम कह्युं के, ॥ ५६ ॥

वासगृहस्यास्य ममा—शोकवने च शालिनि विविधवृक्षैः ॥ मोहगृहमेकमद्भुत—तेजोवर्यं मणिस्तंभैः

नानामणिबद्धमही—पीठं सुंदरचतुष्किकं भोभोः ॥ कुर्वंतु सांद्रचंद्रो—दयरमणीयं विमानमिव ॥ ५८ ॥

अर्थः—हे कारीगरो! आ मारा निवासमेहेलना, नाना प्रकारना वृक्षोथी शोभिता थयेला अशोकवननामना बगीचामां मणिओना स्तंभोथी अद्भुत तेजवडे शोभितो, विविधमणिओवडे बांधेलां पृथ्वीपीठवाळो, सुंदर परशाळवाळो, अने घाटा चंद्रवाओथी रमणीक देखातो देवविमानसरखो तमो एक मोहमेहल बनावो? ॥ ५७ ॥ ५८ ॥ युग्मं ॥

**रचनाभिर्विविधाभि–श्चित्त चमत्कारकाणि तन्मध्ये॥ रचयंतु रुचिगर्भा–गाराणि षडेव षट् दिक्षु ॥५९॥**

अर्थः—वळी ते महेलनी अंदर नानाप्रकारनी रचनाओथी हृदयमां चमत्कार करनारा छ दिशाओमां छ मनोहर ओरडाओ बनावो.

**मणिजालमंजुलजाल–मंदिर मति सुंदरं तथा चैकं॥ तेषां षण्णां मध्ये। भो भोः सद्यो विरचयंतु ॥६०॥**

अर्थः—वळी हे कारीगरो! ते छएओरडाओनी वच्चे तुरत मणिओना समूहनी मनोहर जालीओवालुं एक अति सुंदर मंदिरबनावो?

**विपुलाममलां तस्य तु। मध्ये मणिपीठिकां विरचयंतु॥ विष्वक् प्रथयंतीं खलु। मरीचिनिचयं विरोचिष्णुं**

अर्थः—वळी ते मंदिरना मध्य भागमां खरेखर चोतरफ किरणोना तेजस्वी समूहने विस्तारती, एवी विशाल अने निर्मल मणिओनी पीठिका बांधो? ॥ ६१ ॥

**छेकैः स्तोकैर्दिवसै—स्तत्सर्वं शिल्पिपुंगवैस्तैस्तु॥ रचयांचक्रे श्रीम—न्मल्ल्यादिष्टैरतिगरिष्टैः ॥ ६२ ॥**

अर्थः—पछी ए रीते श्रीमती मल्लीकुमारीए हुकम करेला ते हुशीयार अने महान् कारीगरोए थोडा दिवसमांज ते सघळुं तैयार करी आप्युं. ॥ ६२ ॥

श्रीमल्लिरथ स्वसमा–कारां किल कांचनीं निजां मूर्तिं ॥ पद्मपिधानां शिरसि । च्छिद्रयुतां भ्रमकरीव सतां

अर्थः—पछी ते श्रीमल्लिकुमारीए पोता सरखा आकारवाळी कमलना ढांकणवाळी, तथा मस्तकपर छिद्रवाळी, अने सज्जनोने जाणे भूलावामां पाडे एवी एक सुवर्णमय पोतानी मूर्ति बनावरावी. ॥ ६३ ॥

कवलकमेकं प्रतिदिन–मारंभे भोजनस्य मल्लिजिनः ॥ प्रतिमाछिद्रे विगल–द्रसयुतमक्षेपयत्तत्र ॥ ६४ ॥

अर्थः—पछी ते मल्लिनाथप्रभु हमेशां भोजनवखते गळता रसवाळो एकेको कोळीओ ते प्रतिमाना छिद्रमां नाखवा लाग्या. ॥

पिंडीभूतस्य तत–स्तस्याहारस्य विचलितरसस्य ॥ गंधः स कोऽपि नासा–भेदकरो दुस्सहो जातः ॥६५॥

अर्थः—पछी तेमां ते एकठा थयेला, अने सडी गयेला रसवाळा ते आहारनी एवी तो दुर्गंध उभराइ नीकळी, के जे नाकने फाडी नाखनारी असह्य थइ पडी. ॥ ६५ ॥

यो मृतकुर्कुरपन्नग–गोविस्त्र कलेवरेभ्य एव भृशं ॥ पद्मपिधानोद्घाटा–दधिकतरः पोस्फुरीतितरां ॥६६॥

अर्थः—वळी मृत्यु पामेला कुतरा, सर्प, तथा गायना दुर्गंध मारता कलेवरोथी पण घणीज अधिक ते दुर्गंध, ते कमलनुं ढांकण उघाडवाथी फेलावा लागी. ॥ ६६ ॥

यौवनकालेष्वपि सदा । भवभोगपराङ्मुखा भगवती सा ॥ वरणक्षणमपहर्तु–मेवमुपायान् प्रकुर्वाणा ६७

भ्रातृपितृमातृमुख्यान् । स्वजनान् संप्रीणयंत्यधिकतो या ॥ निजदर्शनेन मल्लिः । सौख्यमसंख्यं भुनक्ति सदा

अर्थः—यौवनवय समये पण हमेशां संसारिक भोगोनी इच्छाविनानी एवी भगवती ते मल्लीकुमारी पोताने वरवानो समय दूर करवामाटे एरीते उपायो करती थकी, ॥ ६७ ॥ पोताना दर्शनथी भाइ, पिता तथा माताआदिक स्वजनोने अधिक अधिक आनंद आपती थकी हमेशां असंख्यातुं सुख भोगवती हती. ॥ ६८ ॥ युग्मं ॥

इतश्च सकलश्रीणां । पदे श्रीकोशलाभिधे ॥ देशे समस्ति साकेत—पुरं सुरपुरोपमं ॥ ६९ ॥

अर्थः—हवे सर्व लक्ष्मीओना स्थानसरखा श्रीकोशलनामना देशमां देवनगरसरखुं साकेतपुरनामनुं नगर छे. ॥ ६९ ॥

तत्रेक्ष्वाकुमहान्वय—विभूषणं वैरिवारदावाग्निः ॥ नाम्ना प्रतिबुद्धिनृपः । प्रशास्ति राज्यं श्रियाप्राज्यं ६९

अर्थः—ते नगरमां ईक्ष्वाकुनामना महान् वंशने शोभावनारो. तथा वैरीओना समूहने दावानल सरखो प्रतिबुद्धिनामे राजा अति समृद्धिवालुं राज्य करे छे.

पद्मावतीव रूप—श्रियास्य पद्मावती सती पत्नी ॥ सातिशयं नागगृहं । तस्मिन्नेकं पुरे प्रौढं ॥ ७० ॥

अर्थः—ते राजाने रूपनी शोभावडे लक्ष्मीदेवीसरखी पद्मावती नामनी सती राणी हती. वळी ते नगरमां एक चमत्कारवालुं तथा विशाल नागदेवतानुं मंदिर हतुं. ॥ ७० ॥

पद्मावत्या लोक–प्रवाहतोऽन्येद्यु रागतो देव्याः ॥ श्रीनागदेवपूजा—क्षणः प्रचुरसंमदविधाता ॥ ७१ ॥

अर्थः-हवे एवामां ते पद्मावतीराणीने अत्यंतहर्ष करनारो ते श्रीनागदेवीनी पूजा करवानो महोत्सव लोकप्रवाहथी आवी पहोंच्यो.

पद्मावतीति भूपं । तदा मुदा विज्ञपयति विनयेन ॥ श्रीनागदेवपूजा–क्षणोऽद्यमेऽस्ति प्रजानाथ ॥७२॥

अर्थ?–हवे ते वखते ते पद्मावती राणी आनंदथी विनयवडे करीने राजाने विनंति करवा लागी के, हे प्रजानाथ! आजे मारे श्रीनागदेवनी पूजा करवानो महोत्सव छे. ॥ ७२ ॥

यद्यादेशः स्यात्त–द्व्रजाम्यहं नाथ नागयात्रायां ॥ आगंतव्यं तत्र । प्रभुणापि मयि प्रसद्याद्य ॥७३॥

अर्थः—हे स्वामी ! जो आपनी आज्ञा होय, तो हुं ते नागदेवनी यात्रामां जाउं, अने आजे मारा पर कृपा करीने आपे पण त्यां पधारवुं. ॥ ७३ ॥

तत्प्रतिपन्ने राज्ञा । देवी पद्मावती मुदितचित्ता ॥ आदेशकारिपुरुषा–मेवमभाषत मधुरवाचा ॥ ७४ ॥

अर्थः–पछी राजाए तेम करवानुं स्वीकार्याथी मनमां आनंद पामेली ते पद्मावती राणीए मधुर वचनथी पोताना नोकरोने एम कह्युं के, ॥ ७४ ॥

भो नाग गृहं गत्वा । स्थलजलजैरतिसुगंधि पुष्पभरैः ॥ कुरुत विशालं कौसुम–मेकंचमंडपमतिरम्यं ॥

अर्थः—तमो ते नागमंदिरमां जइने त्यां जमीन तथा जलमां उत्पन्न थयेलां अति सुगंधि पुष्पोना समूहवडे एक विशाल अने अति मनोहर पुष्पोनो मंडप बनावो? ॥ ७५ ॥

तन्मध्ये कुरुताशु । प्रभूत शोभानिधानमिव चित्रैः ॥ पुष्पैर्ग्रथितं श्रीदा—म धाम सौरभ्यसंपत्तेः ॥७६॥

अर्थः—वळी ते मंडपनी अंदर अत्यंत शोभाना भंडारसरखो, अने सुगंधिनी संपत्तिना धामसरखो, जातजातनां पुष्पोनो बनावेलो तुरत एक गुच्छक बनावो? ॥ ७६ ॥

वादित्रगीतधूपो—त्क्षेपप्रमुखक्रियाविधानपराः ॥ तिष्ठंतु मदागमनं । विमार्गयंतः प्रयत्नेन ॥ ७७ ॥

अर्थः—वळी वाजित्र, संगीत, तथा धूप आदिक क्रियाओमां तत्पर थइने सावधानपणे मारां आगमननी राह जोताथका तमो त्यां उभो? ॥ ७७ ॥

राज्ञ्यादिष्टाः पुरुषा—स्ते सर्वे तदखिलं विधाय ततः ॥ राज्ञीमार्गविलोकन—परायणास्तत्र तिष्ठंति ॥७८॥

अर्थः—ए रीते राणीए हुकम करेला ते सघळा नोकरो ते सघळुं कार्य करीने, पछी त्यां राणीना आगमननी राह जोताथका उभा.

सुस्नाता पद्माव—त्यपि सर्वाभरणभूषिता प्राप्ता ॥ स्वसमसखीसंयुक्ता । ऋद्धिमती स्यंदनारूढा ॥७९॥

अर्थः—पछी सुखेथी स्नान करेली, सर्व आभूषणोथी विभूषित थयेली, तथा पोतासरखी साहेलीओथी युक्त थयेली, समृद्धि सहित ते पद्मावती राणी पण रथमां बेसीने त्यां आवी. ॥ ७९ ॥

घनवाद्यगीतधवल–ध्वनिपूर्णदिगंतरागतैर्लोकैः ॥ व्याप्तं नागगृहं किल । विधीयमानोत्सवप्रकरं ॥८०॥

अर्थः–करातो छे महोत्सवोनो समूह जेमां, एवुं, ते नागमंदिर, घणां वाजित्रो, संगीत, तथा धवलमंगलोना नादोथी दिगंतरोने पूरताथका त्यां आवेला लोकोथी भराइ गयुं. ॥ ८० ॥

पुष्पाद्यैर्नागस्य । प्रतिमामभ्यर्च्य सा राज्ञी ॥ तिष्टति भूपालागम–मिच्छंती विहितदिव्यमहा ॥ ८१ ॥

अर्थः–पछी ते राणी दिव्य महोत्सवपूर्वक पुष्पोआदिकथी ते नागदेवनी पूजा करीने राजाना आगमननी राह जोतीथकी त्यां उभी

भूमीपतिरपि राज्ञ्याः । स्नेहादद्य विहितसारशृंगारः ॥ आरुह्य पट्टहस्तिन–मसंख्यसेनायुतः प्राप ॥ ८२॥

अर्थः—एवामां राजा पण राणीना स्नेहने लीधे आजे उत्तम शृंगार सजीने, तथा पट्टहस्तीपर चडीने, असंख्य सेनासहित त्यां आवी पहोंच्यो. ॥ ८२ ॥

नागस्यार्चां कृत्वा । विधिनाद्भुतपुष्पगंधनैवेद्यैः ॥ वर्यतरपुष्पमंडप–स्थाननिषण्णो नराधीशः ॥ ८३ ॥

अर्थः–पछी ते राजा विधिपूर्वक अद्भुत पुष्पो, धूप, तथा नैवेद्यथी ते नागदेवीनी पूजा करीने उत्तम पुष्पोथी बनावेला रंग मंडपमां आवीने बेठो. ॥ ८३ ॥

भूभृन्मंडपशोभां । विभावयन्नैक्षत क्षणेनासौ ॥ रम्यं तत्रालंबित—श्रीदामाद्भुतसौरभ्यं ॥ ८४ ॥

अर्थः—पछी ते राजा ते पुष्पमंडपनी शोभाने क्षणवारसुधी हृदयमां धारण करतो थको, त्यां लटकावेला अद्भुत सुगंधीवाळा मनोहर पुष्पगुच्छकने जोवा लाग्यो. ॥ ८४ ॥

**रमणीयतां तदीया–मधिकामालोक्य भूमिपालस्य ॥ नेत्रे विश्रामं खलु। प्राप्ते तत्रैव चिरकालं ॥८५॥**

अर्थः—ते पुष्पगुच्छकनुं अतिमनोहरपणुं जोइने ते राजाना बन्ने नेत्रो खरेखर चिरकालपर्यंत त्यांज विश्रामने प्राप्त थयां. ८५

**तदनु चमत्कृतचित्तः। प्राह नरेंद्रः पुरः स्थितं वृद्धं ॥ निजमंत्रिणं सुमंत्रं। बुद्धिनिधानं सुबुध्ध्याख्यं ८६**

अर्थः—पछी मनमां चमत्कार पामेला ते राजाए आगळ बेठेला, वृद्ध, तथा उत्तम सलाह आपनारा, अने बुद्धिना भंडाररूप पोताना सुबुद्धिनामना मंत्रीने कह्युं के, ॥ ८६ ॥

**मंत्रिन्नादेशान्मम। नानानरपतिकुलानि यासि सदा ॥ तत्कथय क्वापीदृग्। श्रीदाम समीक्षितमपूर्वं ॥८७॥**

अर्थः—हे मंत्रिश्वर तमो हमेशां मारा हुकमथी विविध राजाओना दरबारमां जाओ छो, परंतु कहो के, क्यांये आवो अपूर्व पुष्पगुच्छक तमोए जोयो छे. ॥ ८७ ॥

**स्मित्वा किंचिन्मंत्री। प्राह नराधीश शृणु समाधिमनाः ॥ अन्येद्युर्मिथिलापुरि। तवाज्ञयाहं गतोऽभूवं ८८**

अर्थः—त्यारे ते मंत्रीए जरा हसीने कह्युं के, हे राजन! आप ध्यान देइने सांभळो! एक वखते हुं आपनी आज्ञाथी मिथिला- नगरीमां गयो हतो. ॥ ८८ ॥

श्रीमत्कुंभमहीपति—कुलसौधपताकिकासमानायाः ॥ श्रीमल्लिकन्यकाया । धन्यायाः पुण्यपुण्यायाः ॥८९॥

विख्यातः प्रावर्तत । वर्ष ग्रंथ्याख्यसन्महस्तु तदा ॥ यस्मिन् दिवसे वर्षं । पूर्णं स्यात्तद्दिनप्रथकः ॥९०॥

अर्थः—त्यां श्रीमान् कुंभराजाना वंशरूपी मेहेलनी पताकासरखी, भाग्यशाली तथा पुण्यथी पवित्र एवी श्रीमल्लीकुमारीनुं जे दिवसे वर्ष पूर्ण थतुं हतुं, ते दिवसने उजवनारो वर्षगांठ नामनो प्रख्यात महोत्सव ते वखते प्रवर्ती रहेलो हतो. ।८९।-।९०। युग्मं।

तस्मिन् मनोहरमहे । सुमहान् पुष्प मंडपः ॥ मंदारोदारमालाभि—रभूद्विरचितः क्रमात् ॥ ९१ ॥

अर्थः—ते मनोहर महोत्सवनी अंदर अनुक्रमे गोठवेली कल्पवृक्षना पुष्पोनी मनोहरमालाओवडे एक विशाल मंडप बांधवामां आव्यो हतो. ॥ ९१ ॥

दृष्टं तदंतः श्रीदाम । यन्मया दिव्यसौरभं ॥ बद्धं तदग्रे भूजाने । कियन्मात्रमिदं किल ॥ ९२ ॥

अर्थः—हे राजन् ! ते पुष्पमंडपनी अंदर लटकावेलो, दिव्यसुगंधिवाळो जे पुष्पगुच्छक में जोयो छे, तेनी आगळ खरेखर आ पुष्पगुच्छक (तोरण) शुं हिसाबमां छे ? ॥ ९२ ॥

विस्मयमुत्तार्य ततः । श्रीदाम्नः क्षितिपतिः श्रवणसुखदे ॥ श्रुतमात्रेऽपि श्रीम—न्मल्लेर्नाम्नि न्यधाच्चित्तं ९३

अर्थः—(ते सांभळीने) राजा ते पुष्पगुच्छकप्रत्येना आश्चर्यने विसरी जइने, सांभळवामात्रथीज श्रवणोने सुख आपनारां श्रीमती मल्लीकुमारीना नाममांज पोतानुं हृदय चोंटाडवा लाग्यो. ॥ ९३ ॥

पप्रच्छ प्राग्मोहा—न्मंत्रिणमिति सादरं पुना राजा ॥ मंत्रिन्निवेद्यत मम । कीदृग्रूपास्ति मल्लिकनी ९४

अर्थः—पछी पूर्वभवना मोहथी ते राजाए फरीने आदरमानपूर्वक मंत्रिने एम पूछ्युं के, हे मंत्रीश्वर! ते मल्लिकाकुमारिका केवां स्वरूपवाळी छे? ते मने निवेदन करो? ॥ ९४ ॥

बुद्धिधरोऽवग् नृपते । तस्याः किं वर्णयाम्यहं रूपं ॥ यद्वर्णयितुमशक्ता । भवंत्यहो सर्वविश्वविदः ॥९५॥

अर्थः—त्यारे ते मंत्रीश्वरे क केह्युं, हे राजन्! तेणीना स्वरूपनुं हुं शुं वर्णन करुं? के जेनुं वर्णन करवाने अहो? सर्व जगतने जाणनारा केवली अशक्त छे. ॥ ९५ ॥

किं बहुनोक्तेन विभो। नैवोपमितिं भजेत् त्रिजगदंतः ॥ केवल्यसौख्यवदहो । तस्या रूपं निरुपमश्रि ९६

अर्थः—हे स्वामी! वधारे कहेवाथी शुं? अहो! कैवल्य (मोक्ष) सुखनी पेठे अनुपम शोभावाळां तेणीना स्वरूपने त्रणे जगतनी अंदर कोइनी पण उपमां आपी शकाय तेम नथी. ॥ ९६ ॥

सचिवोक्तमिति श्रुत्वा । बभार भूमीपतिर्निजे चित्ते ॥ श्रीमल्लिपाणिपीडन—सत्कां तत्कालमुत्कंठां ॥ ९७ ॥

अर्थः—ए रीतनुं मंत्रीनुं वचन सांभळीने ते राजा पोताना हृदयमां तेज वखते ते मल्लीकुमारीने परणवा संबंधी उत्कंठा धारण करवा लाग्यो. ॥ ९७ ॥

नृपतिस्तदैव दूतं । स्वसमोहितसाध्यसाधनाय ततः ॥ द्रुतमादिदेश मिथिलां । नगरींप्रति शास्त्रवेत्तारं

अर्थः—पछी राजाए तेज वखते पोतानुं इच्छित कार्य साधवामाटे तुरत मिथीला नगरी प्रते जवाने एक शास्त्रकोविद (विचक्षण) दूतने हुकम कर्यो. ॥ ९८ ॥

श्रीमत्कुंभनरेश्वर–योग्यं सत्प्राभृतं प्रदाय मुदा ॥ तस्मै स स्वार्थे श्री–मल्लिकनीवरणमाख्यदथ ॥ ९९ ॥

अर्थः—पछी श्रीमान् कुंभराजाने आपवा लायक उत्तम भेटणुं आपीने हर्षथी ते राजाए ते दूतने पोतामाटे श्रीमल्लिकुमारीने परणवानुं मागुं करवानुं कह्युं. ॥ ९९ ॥

प्रतिपद्य स्वस्वाम्या–देशं दूतः समेत्य निजसदनं ॥ रथमारुह्य सहायैः । कतिभिरचालीत्ततस्त्वरितं ॥१००॥

अर्थः—ए रीतनो पोताना स्वामिनो हुकम स्वीकारीने, तथा पोताने घेर आवीने ते दूत रथमां बेसीने केटलाक साथीओसहित तुरत त्यांथी चालतो थयो. ॥ १०० ॥

॥ इति प्रथमनृप दूता गमनं ॥

पुनरपरमंगदेशे–ऽच्युतलक्ष्मी संश्रिताब्धिरिव सततं ॥ बहुवैरिकृतकंपा । चंपानगरीति विख्याता ॥१॥

अर्थः—हवे अंगनामना देशमां विष्णु तथा लक्ष्मीथी आश्रित थयेला महासागर सरखी. तथा घणा शत्रुओने कंपावनारी चंपा-

नामनी प्रख्यात नगरी छे. ॥ १ ॥

**तत्र श्रीमच्चंद्र–च्छायो भूभामिनी पतिर्भुंक्ते ॥ स्वकुलक्रमागतं किल । साम्राज्यं प्राज्यभोगर्द्धिः ॥ २ ॥**

अर्थः––त्यां विस्तीर्ण भोगसमृद्धिवाळो श्रीमान् चंद्रच्छाय नामनो राजा खरेखर पोताना कुलक्रमथी प्राप्त थयेलुं राज्य भोगवे छे

**तत्रार्हन्नकमुख्या । निवसंति महेश्वरादि वृषरागाः ॥ येषां नित्यं पोषक–भावोऽभूत्सिंधुना साकं ॥ ३ ॥**

अर्थः–ते नगरमां महेश्वर आदिक धर्मना रागी अर्हन्नकआदिक व्यापारीओ वसता हता, के जेओनी आजीविका हमेशां महासागरसाथे संबंध धरावती हती. ॥ ३ ॥

**जिनधर्म संपदा ते–ष्वधिकोऽर्हन्नकमहेभ्योऽभूत् ॥ सम्यक्त्व रुचिर्योऽसुर–सुरैर्न च क्षोभितः क्वापि ॥४॥**

अर्थः–तेओमां जैनधर्मनी संपदाथी अर्हन्नकनामनो शेठ मुख्य हतो., सम्यक्त्वनी रुचिवाळा एवा ते शेठने देवो तथा दानवो क्यांये पण क्षोभ पमाडी शक्या नही. ॥ ४ ॥

**अथ जलनिधियात्रार्थं । श्रेष्ठ्यर्हन्नक महेश्वर प्रमुखाः ॥ संपूर्यामितपण्यैः । पोतानि बहूनि चेलुस्ते ॥५॥**

अर्थः–पछी ते अर्हन्नक तथा महेश्वर आदिक श्रेष्टिओ महासागरनी मुसाफरी माटे घणां वहाणो अनेक करीयाणाओथी भरीने चालवा लाग्या. ॥ ५ ॥

संचरतां तेषां कतिचि–द्दिनमध्येंबुद्धौ कुचिह्नानि ॥ प्रादुरभूवन्नाना–क्लेशसमुत्पादकानि भृशं ॥ ६ ॥

अर्थः–ए रीते चालतां थकां तेओने केटलाक दिवसोबाद ते महासागरनी अंदर विविध प्रकारनुं घणुं दुःख उत्पन्न करनारां खराब चिन्हो प्रगट थयां. ॥ ६ ॥

आच्छादित रविकिरणं । सुविस्तृतं दुर्दिनं तदा परितः ॥ हृदये तेषां दुःख–ध्वातं वृद्धिं नयत् परमं ॥

अर्थः–ते वखते सूर्यना किरणोने आच्छादित करनारो वादळांओनो समूह चारे बाजुएथी विस्तार पामवा लाग्यो, अने तेथी तेओना हृदयमां दुःखरूपी अंधकार अति वृद्धि पामवा लाग्यो. ॥ ७ ॥

निष्ठुर खाट्कारकरं । घोरं घनगर्जितं तदा जातं ॥ बहुशो विद्युद्वल्ली–झात्काराः सर्वतश्च ततः ॥८॥

अर्थः–वळी ते वखते निष्ठुर अवाज करती भयंकर मेघगर्जना थवा लागी, अने पछी सर्व बाजुएथी विजळीओना घणा झबकारा थवा लाग्या. ॥ ८ ॥

घन कज्जलपुंजैरिव । निष्पन्न मथोत्थितं तमोजालं ॥ विससार सर्वदिक्षु । प्रवहण जनभूरि दुःखकरं ॥

अर्थः—घाटां काजळना समूहोनुं जाणे बनेलो होय नहीं! एवो अंधकारनो समूह प्रगट थयो, अने ते वहाणपरना माणसोने अति कष्ट उपजावतो थको सर्व दिशाओमां फेलावा लाग्यो. ॥ ९ ॥

लोहितनयनं चुल्ही–विवराकृति नासिकं प्रलंबकरं ॥ भग्नग्रीवं स्थूलो–त्पाटित बाहुद्वय करालं ॥ १० ॥
अंधावट समनाभि–प्रदेशमतनु तरोदरं कंचित् ॥ दुस्कंधशुष्कवृक्षा--वलंबिभुज युग वितत शाखं ११
आयांतं यमसोदर--रूपं वेतालमंतिकं क्वापि ॥ दृष्ट्वा व्याकुलमनसो । जाताः सांयात्रिकाः सर्वे ।१२। त्रि०

अर्थः—एवामां लाल आंखोवाळा, चुल्हाना बांकोरा सरखा आकारवाळी नासिकावाळा, लांबा हाथवाळा, भांगेली गरदनवाळा, जाडा अने उगामेला बन्ने हाथोथी भयंकर देखातो, ॥ १० ॥ अंधारा कुवासरखा नाभिप्रदेशवाळा, विस्तीर्ण पेटवाळा, वांकाचूका सूका वृक्षना टेकावाळा बन्ने हाथरूपी विस्तीर्ण शाखवाळा, ॥ ११ ॥ अने यमसरखा स्वरूपवाळा कोइक वेतालकने क्यांकथी नजीक आवतो जोइने वहाणमां बेठेला सघळा मुसाफरो मनमां व्याकुल थवा लाग्या. ॥ १२ ॥ त्रिभिर्विशेषकम् ॥

मुक्त्वार्हन्नकमेकं । प्रवहण वणिजोऽतिविह्वलाः सर्वे ॥ निजगोत्र देवतादीन् । स्मरंति दुखार्दिता बाढं ॥

अर्थः—ते वखते एक अर्हन्नक शिवायना वहाणमां बेठेला बीजा सर्व व्यापारीओ दुःखथी अत्यंत पीडित थइने पोतानी गोत्र-देवीआदिकोने याद करवा लाग्या. ॥ १३ ॥

स्वस्वेष्ट देवतानां । यात्रां भोगं तथा च नैवेद्यं ॥ विपदुत्तरणकृते द्राग् । जनास्त्व मन्यंत सर्वेऽपि ॥१४॥

अर्थः—वळी ते सघळा लोको ते आपदामांथी तुरत उगरवा माटे पोतपोताना इष्टदेवोनी यात्रा, भोगो, तथा नैवेद्य चडाववा-माटेनी मानता करवा लाग्या. ॥ १४ ॥

केचिन्नव परिणीत—स्त्रीरागेणापरे सुतानां च ॥ केचिद्बंधुजनानां । स्वद्रविण विमोह तस्त्वन्ये ॥ १५ ॥
वृद्धपितृमातृ निर्वाह—ध्यानपराः पुनः परे केचित् ॥ प्रौढ स्वावासस्मृति—पराः पुनर्मृत्यु भयभीताः १६
किं कर्तव्यतया मूढा—स्तस्थुः कंठगतासवः ॥ अहर्निशं महारौद्रा—र्त्तध्यान वशवर्तिनः ॥१७॥ त्रिभिर्वि०

अर्थः—केटलाक पोतानी नवी परणेली स्त्रीना रागथी, केटलाक पुत्रोना रागथी, केटलाक कुटुंबिओना रागथी, तथा केटलाक पोताना द्रव्यना मोहथी ॥ १५ ॥ केटलाक (पोताना) वृद्ध मातापिताना निर्वाहना विचारथी, अने बीजा केटलाक पोतानी म्होटी म्होटी हवेलीओने याद लावीने, मृत्युथी भयभीत थयाथका, ॥ १६ ॥ हवे शुं करवुं? एम मूढ थयाथका, कंठमां प्राण धारण करीने हमेशां महान आर्त अने रौद्रध्यानने वश थइ गया. ॥ १७ ॥ त्रिभिर्विशेषकं ॥

अर्हन्नकस्तु जिनवर—धर्मज्ञः श्राद्धशेखरः श्रीमान् ॥ कलयन् वेतालं तं । कृतांतवद्विघ्नदं लोके ॥१८॥

अर्थः—जिनेश्वरप्रभुना धर्मने जाणनारो, तथा श्रावकोमां शिरोमणि, एवो श्रीमान् ते अर्हन्नकशेठे तो, दुनीयामां यमनीपेठे विघ्न करनारा ते वेतालने जाणी लीधो. ॥ १८ ॥

अर्हद्धर्मो दुःस्था—वस्थायामेक एव संसारे ॥ अवलंबनमिति चित्ते । निश्चिन्वानो गतातंकः ॥ १९ ॥

अर्थः—तथा विपत्तिसमये आ संसारमां फक्त एक श्रीजिनेश्वरप्रभुनो धर्मज आधाररूप छे, एम पोताना हृदयमां निश्चय करीने तेतो निर्भय थइने रह्यो. ॥ १९ ॥

**प्रवहणदेशं विजनं। समेत्य विधिना प्रमृज्य जानुभ्यां ॥ स्थित्वा शीर्षकृतांजलि–रकरोच्चजिनस्तुतिं भक्त्या**

अर्थ —तथा वहाणना निर्जन प्रदेशमां आवीने, विधिपूर्बक ते प्रदेशनुं प्रमार्जन करीने, घुंटणीए पडी, मस्तकपर हाथ जोडीने ते भक्तिथी जिनेश्वरप्रभुनी स्तुति करवा लाग्यो. ॥ २० ॥

**आराधनां च विधिना। कृत्वा साकारमनशनं लाति ॥ यद्युपसर्गादस्मा–न्मरणं मे भवति नियमेन ॥२१॥**

अर्थः—पछी विधिपूर्बक आराधना करीने तेणे सागारी अनशन ग्रहण कर्युं. अने ते माटे एम धार्युं के, जो आ उपसर्गथी मारुं कदाच निश्चयपूर्बक मृत्यु थाय, ॥ २१ ॥

**बाह्यांतरंगरूपः। संगः सर्वोऽपि तन्मया मुक्तः ॥ कायोत्सर्गश्चास्तु। ममाजन्मैष शुभभावेन ॥ २२ ॥**

अर्थः–तो में बहारनो तथा अंतरंग सघळो संग त्यजी दीधो छे, अने छेक जीवितपर्यंत शुभभावपूर्बक मारो आ कायोत्सर्ग रहो?

**धनकनक कुटुंबादि—ष्वासक्तिर्वर्जिता समस्तापि ॥ इह जन्मनि भूयान्मे। मैत्री जीवेषु सर्वेषु ॥ २३ ॥**

अर्थः—वळी में धन, सुवर्ण, तथा कुटुंबआदिकनी सघळी आसक्ति तजी दीधी छे, तथा आ भवमां सर्व जीवोप्रते मारी मित्राइ होजो? ॥ २३ ॥

**अथ वेतालः कोपा–टोपप्रकटप्रकंप्रतनुलतिकः ॥ एत्यार्हन्नकपार्श्वे। कृतभृकुटिरलं जगादेति ॥ २४ ॥**

अर्थः—एवामां क्रोधना आटोपथी प्रकट रीते कंपतुं छे शरीर जेनुं, ए ते वेताळ ते अर्हन्नकपासे आवीने, तथा खूब भृकुटी चढावीने कहेवा लाग्यो के, ॥ २४ ॥

रे कुमते दुष्टात्मन् । मुधा किमेतत् करोषि पाखंडं ॥ त्यज धर्मं जैनमरे । कुरु मिथ्यात्वं प्रयत्नेन ॥२५॥

अर्थः—अरे! दुष्ट! दुर्बुद्धि! फोकट आ पाखंड तुं शामाटे आदरी बेठो छे? जैनधर्मने त्यजी दे? अने प्रयत्नपूर्वक मिथ्यात्वनो स्वीकार कर? ॥ २५ ॥

नोचेत्तद्बोहित्थं । स्वांगुल्योत्क्षिप्य वारिधावस्मिन् ॥ निष्ठुरघातात्पर्पट—वच्चूर्णं चूर्णयिष्यामि ॥ २६ ॥

अर्थः—नहिंतर आ वहाणने मारी आंगळीवडे उछाळीने, आ महासागरमां भयंकर प्रहारथी पापडनीपेठे चूरेचूरा करी नाखीश.

भ्रष्टः स्वजीवितव्या—द्विभवादस्माच्च दुःखभाक् तेन ॥ मृत्युमवाप्स्यसि जलनिधि—मध्ये त्वमकाल एव जडः

अर्थः—अने तेथी पोताना जीवितथी तथा आ वैभवथी भ्रष्ट थइने दुःखी थयोथको तुं मूर्ख अकालेज आ महासागरनी अंदर मृत्यु पामीश. ॥ २७ ॥

तन्मम कथितं निजहित—कृते कुरु त्वं जडाशय त्वरितं ॥ येनांशमात्रमपिते । दुःखं नो भावि सलिलनिधौ

अर्थः—माटे हे मूर्खविचारवाळा अर्हन्नक! तारा पोताना हितमाटे तुं तुरत म्हारा कहेवामुजब कर? के जेथी तने आ महासागरमां लेशमात्र पण दुःख थशे नही. ॥ २८ ॥

अर्हन्नकस्तु मौनी । मनसैव तमब्रवीदिदं वाक्यं ॥ किं दर्शयतीह भवा–नेवमिदानीं च भीतिं मे ॥२९॥

अर्थः—त्यारे ते अर्हन्नक तो मौन रहोथको फक्त मनथीज तेने एम कहेवा लाग्यो के, (अरे दुष्ट !) आ समये तुं मने आरीते शामाटे भय बतावे छे ? ॥ २९ ॥

धनधान्यादि सर्वस्वं । यातु यातु मम क्षयं ॥ मृत्युरायातु मे जैनं । धर्मं तु न जहाम्यहं ॥ ३० ॥

अर्थः—मारी धन धान्यआदिक सर्व वस्तुओनो भले विनाश थाओ ? मारुं मरण पण भले थाओ ? परंतु हुं जैनधर्मनो त्याग करीश नही. ॥ ३० ॥

तेनैवं निजमनसा। कथिते कुपितोऽधिकं स वेतालः ॥ अंगुलियुगलेनोद्–क्षिपत्प्रवहणं क्षणान्नभसि ॥३१॥

अर्थः—एरीते तेणे पोताना मनवडे कहेवाथी अधिक क्रोध पामेला ते वेताले पोतानी बे आंगळीओवडे क्षणवारमां ते वहाणने आकाशमां उछाळ्युं. ॥ ३१ ॥

तेन दोलायमानेऽस्मिन् । पोतेऽत्यंतं सुमेरुवत् ॥ चकंपेऽर्हन्नकस्याहो । स्वधर्मान्नैव मानसं ॥ ३२ ॥

अर्थः—तेथी ते वहाण अत्यंत आंदोलित थवा लाग्युं, परंतु अहो! ते अर्हन्नकनुं मन मेरुपर्वतनीपेठे स्वधर्मथी चलायमान थयुं नही. ॥ ३२ ॥

कल्लोलाग्रात्पात्यमानं । शनैः पोतं दधद्र दधत् ॥ वेतालोऽदर्शयद्भीतिं । कातरप्राणनाशिनीं ॥ ३३ ॥

अर्थः—म्होटा मोजांओथी तोडी पडातां ते वहाणने धीमेथी धारण करतोथको ते वेताल कायर मनुष्योना प्रोणोनो नाश करे एवो भय बतावया लाग्यो. ॥ ३३ ॥

मेरुरिवाकंप्रं स—द्धर्मध्यानं विलोक्य तस्य सुरः ॥ बिभीषणरूपं मुक्त्वा । चक्रे स्वाभाविकं रूपं ॥३४॥

अर्थः-पछी मेरुनीपेठे निष्कंप एवा तेना उत्तम धर्मध्यानने जोइने, ते देवे पोतानुं भयंकररूप तजीने स्वाभाविकरूप प्रगट कर्युं.

सप्तसप्तिस्फुरत्कांति—दीप्यमानविभूषणः ॥ कल्पद्रुकुसुमाक्लृप्त—धम्मिलः स्फारवेषभृत् ॥ ३५ ॥

दुंदुभिध्वनितैर्दिव्यै—र्बधिरीकृतदिग्गणः ॥ कुर्वन् जयजयारावं । पुष्पवृष्टिं च सर्वतः ॥ ३६ ॥

प्रादुरासीत्सुरः कोऽपि । चलत्कुंडलमंडलः ॥ जगदद्भुतरूपश्री–विस्मिताखिलविष्टपः ॥३७॥ त्रिभिर्विशेषकं

अर्थः—सूर्यसरखी स्फुरायमान कांतिवाळां चळकतां आभूषणोवाळो, कल्पवृक्षना पुष्पोथी गुंथेला केशोवाळो, मनोहर पोषाक धारण करनारो, ॥ ३५ ॥ दुंदुभिओना दिव्य नादोथी दिशाओना समूहने पण ब्हेरो करनारो, जयजय शब्द करतो, तथा सर्व बाजुएथी पुष्पोनी वृष्टि करतो, ॥ ३६ ॥ चलायमान कुंडलमंडलवाळो, तथा दुनियामां अद्भुतरूपनी शोभाथी समस्त जगतने आश्चर्य पमाडनारो कोइक देव प्रगट थयो. ॥ ३७ ॥ त्रिभिर्विशेषकं ॥



दुर्निमित्तेषु शांतेषु । सर्वेषु क्षणमात्रतः ॥ नो भीतिरिति पोतानां । स्वस्थीभूतो जनोऽखिलः ॥ ३८ ॥

अर्थः—पछी क्षणमात्रमां ते सघळां दुष्ट चिह्नो शांत थयाबाद ते वहाणोनो भय दूर थयो, अने ते सर्वे लोको पण स्वस्थ थया.

व्याजहारसुरः स्फार—गिरा मधुरया ततः ॥ भो अर्हन्नक सुश्राद्ध । जय श्रद्धासुधांबुधे ॥ ३९ ॥

अर्थः—पछी ते देवे मधुर अने विस्तीर्ण वाणीथी कह्युं के, हे अर्हन्नकनामना उत्तम श्रावक! तथा श्रद्धारूपी अमृतना महासागरसरखा तुं जय पाम ? ॥ ३९ ॥

श्रेयांस्तवावतारः । श्लाघ्यं ते जीवनं नरभवस्य ॥ जिनधर्मश्रद्धायां । यतोऽचलो मेरुचूलेव ॥ ४० ॥

अर्थः—तारो अवतार कल्याणकारी छे, तेमज मनुष्यभवसंबंधि तारुं जीवन प्रशंसाने पात्र छे, केमके तुं मेरुशिखरनीपेठे जैनधर्मनी श्रद्धामां निश्चल छे. ॥ ४० ॥

भोभो शृणु सौधर्म—स्वर्गाधीशः सुविक्रमः शक्रः ॥ त्वामेवं सुरपरिष—न्मध्ये प्रशशंस हृष्टमनाः ॥ ४१ ॥

अर्थः—हवे तुं सांभळ ? के उत्तम पराक्रमवाळा सौधर्मेंद्रे मनमां आनंद पामीने देवोनी सभामां तारी आरीते प्रशंसा करेली छे.

शृणुत सुरा भो जंबू—द्वीपगभरते समस्ति चंपायां ॥ श्राद्धोऽर्हन्नकनामा । धामार्हद्धर्मसंपत्तेः ॥ ४२ ॥

अर्थः—हे देवो! तमो सांभळो ? जंबुद्वीपमां आवेला भरतक्षेत्रमां चंपानगरीनी अंदर जैनधर्मनी संपत्तिना धामसरखो अर्हन्नकनामे श्रावक वसे छे. ॥ ४२ ॥

स सुरैरसुरै रक्षो—यक्षैर्वा सकलदिव्यनिजशक्त्या ॥ वात्याभिः सुरगिरिरिव । न क्षोभ्यः प्रवरजिनधर्मात्

अर्थः—वायु जेम मेरुपर्वतने तेम ते श्रावकने देवो, दानवो, राक्षसो के यक्षो पोतानी सघळी दिव्यशक्तिथी पण जैनधर्मथी चलायमान करी शके तेम नथी. ॥ ४३ ॥

**प्रतिपन्ने वचनेऽस्मिन् । सर्वैः सामाजिकैस्त्रिदशवर्गैः ॥ किंतु मया प्रतिपन्नं । न वचस्तच्चिंतितं चेति ॥४४॥**

अर्थः—सभामां बेठेला सर्व देवसमूहोए (इंद्रनुं) ते वचन स्वीकार्युं, परंतु में ते वचन स्वीकार्युं नही, अने एम विचार्युं के, ४४

**परमैश्वर्यभृतात्मा । यद्यन्मिथ्यावचो वदेदिंद्रः ॥ तत्तत्सेवकमन्या । मन्यंते चाटुजल्पाकाः ॥ ४५ ॥**

अर्थः—महान समृद्धिवाळो इंद्र जे जे मिथ्या वचन बोले, ते ते वचनने तेनुं सेवकपणुं माननारा खुशामतखोर देवो सत्य मानी बेसे छे. ॥ ४५ ॥

**गणनातिगशक्तिमतः । सुरस्य पुरतोऽत्र कीटकस्याहो ॥ का स्थैर्यवर्णनायां । श्लाघा किल मर्त्यमात्रस्य**

अर्थः—अहो ! आ जगतमां अगणित शक्तिवाळा देवनी पासे फक्त एक कीडासरखा मनुष्यनुं स्थिरपणानुं वर्णन करीने जे-प्रशंसा करवी, ते खरेखर शा कामनी छे ! ॥ ४६ ॥

**धर्मे स्थैर्यं तावत् । प्रवर्तते भूस्पृशो दृढतरस्य ॥ यावत्प्रगल्भते न हि । कश्चित् त्रिदशोऽमितप्रभुतः ॥४७॥**

अर्थः—केमके खरेखर अमाप शक्तिवाळो कोइक देव ज्यांसुधी सामे थतो नथी, त्यांसुधीज अति दृढ मनुष्यनी पण धर्ममां स्थिरता टकी शके छे. ॥ ४७ ॥

॥ ४४ ॥

गत्वा ततः परीक्षां । कुर्वेऽहं तस्य जैनधर्मस्य ॥ अत्रागत्य मया किल । विकुर्वितं माययैवैतत् ॥ ४८ ॥

अर्थः–माटे त्यां जइने तेना जैनधर्मनी हुं परीक्षा करुं, एम विचारी अहीं आवीने खरेखर आ सघळुं कटक्रियाथीज में विकुर्वेलुं हतुं. ॥ ४८ ॥

यादृग्रूपः श्रीम—त्पुरंदरेण प्रशंसितस्त्वं भोः ॥ धर्मस्थैर्येऽसि ततो–ऽधिकं महाभागधौरेय ॥ ४९ ॥

अर्थः—परंतु भाग्यशालीओमां शिरोमणि एवा हे अर्हन्नक ! इंद्रे जेवी तारी प्रशंसा करी हती, तेथी पण अधिक तारामां धर्मसंबंधी स्थिरता छे. ॥ ४९ ॥

यद्यन्मयापराद्धं । भवतस्तत्क्षम्यतां महाभाग ॥ इत्यालप्याढौकत । कुंडलयुगलेपुरस्तस्य ॥ ४९ ॥

अर्थः—हे महाभाग्यशाली ! में तारो जे जे अपराध कर्यो छे, तेमाटे तारे क्षमा करवी, एम कहीने तेणे ते अर्हन्नकनी पासे कुंडलोनी बे जोडीनी भेट धरी. ॥ ४९ ॥

विद्युज्झात्कार इवा–दर्शनमाप्ते ततः सुरे तस्मिन् ॥ स्वीयं प्रत्याख्यानं । निर्विघ्नमपारयत्स वणिक् ॥५०॥

अर्थः—पछी विजळीना झबकारानीपेठे ते देव अदृश्य थयाबाद ते अर्हन्नकशेठे विघ्नरहित पोतानुं पच्चख्खाण पार्युं. ॥ ५० ॥

अर्हन्नकमहिमानं । दृष्ट्वा सर्वेऽपि यानपात्रजनाः ॥ आर्हतधर्मा आसन् । दृष्टगुणं को न मन्येत ॥ ५१ ॥

अर्थः—एरीते ते अर्हन्नकशेठनो प्रभाव जोइने ते वहाणमां बेठेला सर्व लोकोए जैनधर्मनो आदर कर्यो, केमके प्रत्यक्ष जोएला प्रभावने कोण माने नही? ॥ ५१ ॥

अनुकूलपवनयोगा–दुत्तीर्णानि क्रमात्प्रवहणानि ॥ गंभीरपोतपत्तन—मचिरात्कुशलेन सर्वाणि ॥ ५२ ॥

अर्थः—पछी अनुकूल वायुना योगे अनुक्रमे ते सर्व वहाणो कुशलक्षेमे तुरतज गंभीरपोतनामना बंदरमां जइने नांगर्यां. ॥ ५२॥

तेभ्यो वस्तूनि ततो । निक्षिप्य क्षिप्रमथ सुगंत्रीषु ॥ मिथिलानगरीं प्रापु—स्तेऽर्हन्नकमुख्यपोतजनाः

अर्थः–पछी ते वहाणोमांथी करीयाणां उतारीने, तथा गाडीओमां भरीने ते अर्हन्नकआदिक व्यापारीओ मिथिलानगरीमां आव्या.

नगरोद्याने वणिजः । संस्थाप्यानांसि सकलवस्तूनां ॥ भूपतियोग्यं प्राभृत–मथ कुंडलयामलं लात्वा ५४

श्रीकुंभ क्षितिपालो–पांते तत्प्राभृतं विमुच्यततः ॥ अर्हन्नकमुख्यास्ते । नेमुर्मौलिस्थकरमुकुलाः ॥ ५५ ॥

अर्थः—पछी करीयाणानी ते सर्व गाडीओ ते नगरना उद्यानमां राखीने, ते अर्हन्नकआदि व्यापारीओ, राजाने आपवालायक कुंडलनी जोडीनी भेट लेइने, तथा ते भेट श्रीकुंभराजापासे मुकीने, पोताना मस्तकपर बन्ने हाथ जोडीने ते राजाने नम्या.

बहुमानदापूर्वं । स्निग्धदृशा पश्यता नरेंद्रेण ॥ स्वागतबहुलाभादि–पृच्छाभिर्भाषितास्तेद्राग् ॥ ५६ ॥ 

अर्थः—त्यारे ते राजाए पण तेओतरफ स्नेहभरेली दृष्टिथी जोइने, तथा तेओने घणुं सन्मान आपीने, तुरत स्वागत तथा

घणा लाभआदिकना प्रश्नोपूर्वक तेओनी साथे वार्तालाप कर्यो. ॥ ५६ ॥

**कन्यावरोधतः श्री–मल्लीमाजूहवत्ततो राजा ॥ साम्राज्यादप्यधिक—स्नेहभरामधिकसौभाग्यां ॥ ५७ ॥**

अर्थः—पछी ते राजाए साम्राज्यथी पण अधिक स्नेहना समूहवाळी, तथा अधिकसौभाग्यवाळी एवी ते श्रीमल्लीकुमारीने कन्याओना अंतःपुरमांथी बोलावी. ॥ ५७ ॥

**स्वभावसुभगाकारा । दिव्यालंकारधारिणी ॥ श्रीमल्लिर्भूषयामास । स्वसखीभिः समं सभां ॥ ५८ ॥**

अर्थः—स्वभावथीज मनोहर आकारवाळी, तथा मनोहर दिव्य आभूषणो धरनारी ते श्रीमल्लीकुमारी पोतानी सखीओसहित (आवीने) राजसभाने शोभाववा लागी. ॥ ५८ ॥

**प्रणतायाः श्रीमल्ले—स्तद्दिव्यकुंडलद्वयं सद्यः ॥ सश्रीकं स्वकरेण च । परिधापयतिस्म कुंभनृपः ॥ ५९ ॥**

अर्थः–पछी नमस्कार करती एवी ते श्रीमल्लीकुमारीने कुंभराजाए तुरत पोताने हाथेज शोभावाळां ते बन्ने दिव्यकुंडलो पहेराव्यां.

**श्रीमल्लिश्रवणस्थित–कुंडलयामलेन तेन तदा ॥ दोलागतजंबूरवि–युगतुलनाऽधारि दिव्यरुचा ॥ ६० ॥**

अर्थः—ते वखते ते श्रीमल्लीकुमारीना कर्णोमां रहेलां बन्ने कुंडलोए (पोतानी) दिव्य कांतिथी हीचोळामां रहेला जंबूद्वीपना बे सूर्योनी तुलना धारण करी, अर्थात् बे सूर्योसरखां देखावा लाग्यां. ॥ ६० ॥

**भूपालेन विसृष्टा । स्वावासं प्राप सा कनी मुदिता ॥ सफलां यात्रामिभ्या–स्तां दृष्ट्वा ते हि मन्यंते ॥६१॥**

अर्थः—पछी राजाए रजा आपवाथी ते मल्लीकुमारी आनंद पामीने पोताना आवासमां गइ, अने ते व्यापारीओ पण तेणीने जोइने खरेखर पोतानी आ मुसाफरीने सफल मानवा लाग्या. ॥ ६१ ॥

**संतोषकृते तेषां । वणिजां श्रीकुंभभूमिपालेन ॥ तत्कालं व्यरचि मुदा । निजदेशे दानमुक्तिरथ ॥६२॥**

अर्थः—पछी ते व्यापारीओने खुशी करवामाटे ते कुंभराजाए तेज वखते आनंदथी पोताना देशमां तेना मालनी जगात माफी करी. ॥ ६२ ॥

**वणिजस्ततः स्ववस्तु–प्रकरं विक्रीय बहुललाभेन ॥ प्रतिवस्तूनि गृहीत्वा । सद्यः परदेशयोग्यानि ॥६३॥**

अर्थः—पछी ते व्यापारीओए त्यां घणा नफाथी पोताना करीयाणाओनो समूह वेंचीने, तेना बदलामां तुरत परदेशने लायक बीजां करीयाणां ग्रहण कर्यां. ॥ ६३ ॥

**वस्तुभिरनांसि भृत्वा । पुनरंबुनिधेस्तटं गता वणिजः ॥ निक्षिप्य ततो भांड–प्रकरं पोतेषु सर्वेषु ॥६४॥**

अर्थः—पछी ते करीयाणाओथी गाडां भरीने ते व्यापारीओ पाछा समुद्रकिनारे आव्या, तथा पछी ते करीयाणाओनो समूह सर्व वहाणोमां भरीने, ॥ ६४ ॥

स्वसमीहितलाभेना–धिकं च मुदितास्ततःप्रतिस्वपुरीं ॥ चेलुः क्रमेण च नभः–स्वतानुकूलेन पुनराशु ॥६५॥

अर्थः—पोतानी इच्छा मुजब मळेला नफाथी अधिक आनंद पामेला ते व्यापारीओ पछी तुरत अनुक्रमे अनुकूल पवनवडे करीने पोतानी नगरी प्रत्ये जवा लाग्या. ॥ ६५ ॥ युग्मं ॥

अचिराच्चंपानगरीं । समागतास्ते क्रमाद्वणिक्पुत्राः ॥ वस्तून्युत्तार्य ततः । पोतेभ्यः प्रमुदितात्मानः ॥६६॥

अर्थः—पछी ते वणिक् पुत्रो अनुक्रमे तुरतज चंपानगरीमां आव्या, तथा मनमां आनंद पामीने तेओए ते वहाणोमांथी करीयाणां उतार्यां, ॥ ६६ ॥

अथ पृथिवीपतियोग्यं । प्राभृतमादाय कुंडलद्वययुग् ॥ अर्हन्नकमुख्येभ्याः । सभामागत्यानमन् भूपं ॥६७॥

अर्थः—पछी ते अर्हन्नकआदिक व्यापारीओ बे कुंडलोसहित राजाने देवालायक भेटणुं लइने, राजसभामां आवी राजाने नम्या.

चंद्रच्छायाराज्ञे । चंद्रच्छायायशस्विने सर्वं ॥ तत्प्राभृतं महेभ्या । मनोहरं ढौकयंतिस्म ॥ ६८ ॥

अर्थः—पछी ते व्यापारीओए चंद्रनी कांति सरखा यशवाळा ते चंद्रच्छाय राजाने ते सघळुं मनोहर भेटणुं भेट कर्युं ॥ ६८ ॥

संतुष्टमना भूपः । कुशलप्रश्नादिपूर्वमेव जगौ ॥ क्वाप्यद्भुतं नु दृष्टं । किंचिदपूर्वं भवद्भिर्भोः ॥ ६९ ॥

अर्थः–तेथी मनमां आनंद पामेला ते राजाए कुशलसमाचारआदिक पूछवापूर्वक कह्युं के, हे व्यापारीओ! शुं तमोए क्यांयें कंइ आश्चर्य जोयुं? ॥ ६९ ॥

श्रुत्वैवं ते वणिजः। प्राहुः स्वामिंस्तवाज्ञया सुचिरं॥ पोतैरब्धिं तीर्त्वा। क्रमेण मिथिलापुरीं प्राप्ताः ॥७०॥

अर्थः—ते सांभळीने ते व्यापारीओ बोल्या के, हे स्वामी ! आपनी आज्ञापूर्वक, वहाणोवडे करीने महासागर तरीने अनुक्रमे अमो मिथिलानगरीमां गया. ॥ ७० ॥

नंतु श्रीकुंभनृपं। हर्षकरीं पर्षदं गतास्तव ॥ अस्माभिः श्रीमल्लि—र्दृदृशे नृपतेः सुतारत्नं ॥ ७१ ॥

अर्थः—त्यां श्रीकुंभराजाने नमवा माटे अमो तेमनी राजसभामां गया. अने त्यां अमोए ते राजानी श्रीमल्लिनामनी रत्नसरखी पुत्रीने जोइ. ॥ ७१ ॥

तस्याः सदृशं रूपं। त्रिजगत्यपि विद्यते न कस्याश्चित् ॥ तदपूर्वा दृष्टा सा। महत्तमं कौतुकं चैतत् ॥७२॥

अर्थः—ते राजकुमारी सरखुं रूप त्रणे जगतमां कोइपण कन्यानुं नथी, एवी ते अपूर्व राजकुमारीने अमोए जोएली छे, अने ते म्होटामां म्होटुं आश्चर्य छे. ॥ ७२ ॥

ततः प्राग्भवसंजात—प्रेमोल्लासितचेतसा ॥ नृपेण पृष्टा श्रीमल्ले—रूपश्रीस्तैस्तु वर्णिता ॥ ७३ ॥

अर्थः—पछी पूर्वभवना संबंधथी उत्पन्न थयेली प्रीतिथी उल्लसायमान थयेला हृदयवाळा ते राजाए ते श्रीमल्लीकुमारीना रूपनी शोभा पूछवाथी तेओए तेनुं वर्णन करी बताव्युं. ॥ ७३ ॥



स गौरवं च निर्माय। दानमुक्तिं विवेकवान् ॥ विससर्ज नराधीश—स्तान् महेभ्यान् प्रमोदभाक् ॥७४॥

अर्थः—पछी ते विवेकी राजाए सन्मानपूर्वक तेओना मालनी जगात मुक्त करीने, हर्षपूर्वक ते महान व्यापारीओने विसर्जन कर्या. ॥ ७४ ॥

ततोऽतिचतुरं दूतं । चंद्रच्छायो नरेश्वरः ॥ पाणिग्रहकृते मल्ले—र्मिथिलां प्रत्यचालयत् ॥ ७५ ॥

अर्थः—पछी ते चंद्रच्छायराजाए ते मल्लीकुमारीसाथे पोतानां लग्न करवामाटे अतिविचक्षण वाचाल दूतने मिथिलानगरीतरफ रवाना कर्यो. ॥ ७५ ॥

॥ इति द्वितीय नृप दूतागमनं ॥

इतश्च नगरी प्रौढ—श्रीपदं पद्मवत्सदा ॥ वाणारस्यस्ति तत्र श्री—शंखः शंखयशा नृपः ॥ ७६ ॥

अर्थः—कमलनीपेठे हमेशां लक्ष्मीना स्थानसरखी वाणारसीनामनी नगरी छे, अने त्यां शंखसरखा उज्ज्वल यशवाळो श्रीमान् शंखनामे राजा छे. ॥ ७५ ॥

श्रीमल्लेर्मिथिलापुर्यां । दिव्यकुंडलयोस्तयोः ॥ तत्कालमन्यदा संधिः । स्फुटं विघटितस्तदा ॥ ७७ ॥

अर्थः—हवे एवामां एक समये मिथिलानगरीमां ते श्रीमल्लीकुमारीना ते बन्ने दिव्यकुंडलोनो सांधो प्रगटरीते अचानक त्रुटी गयो.

स्वर्णकाराः समाहूताः । श्रीकुंभेन विशारदाः ॥ संधातुमर्पितं राज्ञा । तेषां तत्कुंडलद्वयं ॥ ७८ ॥

अर्थः—त्यारे ते श्रीकुंभराजाए हुशीआर स्वर्णकारोने बोलाव्या, अने तेओने ते बन्ने कुंडलो सांधवामाटे आप्यां. ॥ ७८ ॥

बहूपायैरुपक्रांतं । संधातुं तद् द्वयं च तैः ॥ कथमप्येतयोः संधि—र्नामिलद्दिव्यकृत्ययोः ॥ ७९ ॥

अर्थः—तेओए ते बन्ने कुंडलोने सांधवामाटे घणा घणा उपायो कर्या, परंतु दैविक बनावटवाळां ते कुंडलोनो सांधो कोइ पण रीते मळी शक्यो नही. ॥ ७९ ॥

श्रांतास्ततः कलादा—स्ते नरनाथं व्यजिज्ञपन्नेवं ॥ बहुयत्नेऽपि हि संधि—र्न मिलत्यनयोर्नराधीश ॥८०॥

अर्थः—पछी कंटाळी गयेला एवा ते स्वर्णकारोए राजाने एवी विनंति करी के, हे स्वामी! अमोए घणा प्रयत्न कर्या छतां पण आं कुंडलोनो सांधो मळतो नथी. ॥ ८० ॥

यद्यादेशः स्यात्तव । सममनयोः कुंडलद्वयं नव्यं ॥ घटयामः स्फुटशोभा—संभारं तन्नराधीश ॥ ८१ ॥

अर्थः—माटे हे राजन्! जो आपनी आज्ञा होय, तो अमो प्रगटरीते शोभाना समूहवाळां, तथा आ दिव्य कुंडलोजेवांज नवां बे कुंडलो घडी आपीयें. ॥ ८१ ॥

तद्वाक्यश्रवणादेव । हुताशन इवाधिकं ॥ क्रुद्धः कुंभक्ष्माजानि—स्तानित्याक्रोशतिस्म च ॥ ८२ ॥

अर्थः—ते सोनारोनुं तेवुं वचन सांभळवाथीज अग्निनीपेठे अधिक क्रोधायमान थयेला ते कुंभराजाए तेओने तिरस्कारपूर्वक कह्युं के, ॥ ८२ ॥

स्वशिल्पेऽप्यकृतायासाः। के यूयं स्वर्णकारकाः ॥ संधिं योजयितुं नालं। यतो जाता अरे जडाः ॥ ८३ ॥

अर्थः—अरे मूर्खो ! पोतानी कारीगिरिमां पण नापास देखाता एवा तमो केवा स्वर्णकारो छो ? के जे आटलो सांधो जोडवाने पण समर्थ थया नही ! ॥ ८३ ॥

तस्मात्तूर्णं मूर्खा–स्त्यजतास्मद्धरणिमंडलं दूरात् ॥ इति भूभुजा स्वविषया—द्बहिराज्ञता भयार्तास्ते

अर्थः—माटे अरे मूर्खो ! तमो मारा देशनी भूमि छोडीने अहींथी तुरत चाल्या जाओ ? एम कहीने भयभीत थयेला ते सघळा सोनारोने राजाए पोताना देशमांथी बहार जवानो हुकम कर्यो. ॥ ८४ ॥

स्वं स्वं गृहोपकरणं। सारमनोभिर्द्रुतं समादाय ॥ मिथिलापुरीबहिस्ता–द्विनिर्गतास्ते भृशं भीताः ॥८५॥

अर्थः—पछी अति भय पामेला एवा ते सोनारो पोतपोतानी सारसार घरवखरी गाडांओमां भरीने तुरत ते मिथिलानगरीनी बहार निकळी गया. ॥ ८५ ॥

मिथिलामंडलमखिलं। क्रमादतिक्रम्य ते कलादवराः ॥ काशीनगरीक्रीडो–द्याने कुशलादथाजग्मुः ॥८६॥

अर्थः—पछी अनुक्रमे ते सुवर्णकारो ते मिथिलानगरीना देशनी हद ओळंगीने कुशलक्षेमे काशीनगरीना क्रीडा करवाना उद्यानमां आवी पहोंच्या. ॥ ८६ ॥

गंत्वीः स्वकुटुंबयुता–स्तत्रोद्याने निवेश्य सर्वेऽपि ॥ प्राभृतमवनिपयोग्यं । स्वर्णकृतः सत्वरं लात्वा ॥८७॥

अर्थः—पछी ते सघळा सोनारो पोताना कुटुंबोसहित ते माडांओने ते उद्यानमां राखीने, तथा राजाने आपवालायक भेटणुं

संभूय शंखभूपति–सभां समागत्य मुदिततरमनसः ॥ भूमीपतिं प्रणेमु–र्मुक्त्वाग्रे प्राभृतमशेषं ॥ ८८ ॥

लेइने, तुरत ॥ ८७ ॥ एकठा थइने, तथा मनमां हर्ष पामीने त्यांना शंखराजानी सभामां आवीने, तथा सघळी भेटो ते राजा-पासे मूकीने तेओ तेने नम्या. ॥ ८८ ॥ युग्मं ॥

सुप्रसन्नदृशा पश्यन् । नृपतिस्तानवोचत ॥ पुर्यागमनावास—स्थानवृत्त्यादिकारणं ॥ ८९ ॥

अर्थः—त्यारे प्रसन्न नजरे राजाए तेओतरफ जोइने तेओने (पोताना) नगरमां आववानुं, निवास करी रहेवानुं, तथा धंधा-रोजगारआदिकनुं कारण पूछ्युं. ॥ ८९ ॥

वृत्तांते सकले प्रोक्ते । ततस्तैर्मुदिताशयैः ॥ काश्यागमावधि क्ष्मापो––ऽभवन्मल्लिरतिर्भृशं ॥ ९० ॥

अर्थः—त्यारे मनमां खुशी थयेला ते स्वर्णकारोए छेक काशीनगरीमां आवी पहोंच्या सुधीनो पोतानो सघळो वृत्तांत राजाने कही संभळाववाथी ते राजा ते मल्लिकुमारीप्रते अत्यंत रागी थयो. ॥ ९० ॥

भूपस्तान् स्वर्णकृतः । स्वकपुर्यां मध्यगान् भृशं मुदितः ॥ अर्पयतिस्मावासा–नुदारचेता मनोऽभीष्टान्

अर्थः--पछी अतिखुशी थयेला ते राजाए ते स्वर्णकारोने ( वसवामाटे ) उदार चित्तथी, पोतानी नगरीना मध्यभागमां र-
हेला मनगमता आवासो आप्या. ॥ ९१ ॥

मल्लिकनीमुद्वोढुं। भृशमुत्कंठितमनाः क्षमापालः॥ मिथिलांप्रति दूतवरं। कंचिद्चालयद्चलधैर्यः ॥९२॥

अर्थः--पछी ते मल्लीकुमारीने परणवामाटे अति उत्कंठित थयेला, तथा निश्चल धैर्यवाळा, एवा ते शंखराजाए कोइक चतुर
दूतने मिथिलानगरीप्रते रवाना कर्यो. ॥ ९२ ॥

॥ इति तृतीयनृपदूतागमनं ॥

कुणालाख्या पुरीख्याति-मतीतश्चास्ति सद्गुणा ॥ नाकश्रियं हसंतीव । स्फुरद्धामप्रभामिषात् ॥ ९३ ॥

अर्थः—उत्तम गुणोवाळी, तथा विस्तीर्ण मेहेलोनी कांतिना मिषथी जाणे देवलोकनी शोभानी हांसी करती होय नही! एवी
कुणालानामनी प्रख्यात नगरी छे. ॥ ९३ ॥

तत्र रुक्मद्युती राज्यं । रुक्मी राजा भुनक्ति च ॥ धारिणीति प्रिया तस्य। शीलसौभाग्यधारिणी ॥९४॥

अर्थः—ते नगरीमां सुवर्णसरखी कांतिवाळो रुक्मीनामे राजा राज्य करे छे, अने तेनी शील अने सौभाग्यने धारण करनारी
धारिणीनामे राणी छे. ॥ ९४ ॥

अस्ति कन्या सुबहुला--नाम्नी रूपवरा तयोः ॥ स्वपित्रोश्चित्तसरसी—राजहंसीगुणोज्ज्वला ॥ ९५ ॥

अर्थः--तेओने उत्तम स्वरूपवाळी सुबहुलानामनी कन्या छे, के जे पोताना मातपिताना हृदयरूपी तळावडीमां राजहंसीसरखा गुणोवडे निर्मळ थयेली छे. ॥ ९५ ॥

चातुर्मासिकनामा । तस्याः किल मज्जनोत्सवोऽन्येद्युः ॥ भूमिपतेरादेशा—दासीद्दासीकृताराते: ॥ ९६ ॥

अर्थः—एक दिवसे, दासरूप करेल छे शत्रुओने जेणे, एवा ते राजानी आज्ञाथी चातुर्मासिकनामनो तेणीना स्नात्रमहोत्सवनो प्रारंभ थयो. ॥ ९६ ॥

तत्र पुष्पैः सदामोदैः । पंचवर्णैर्मनोरमैः ॥ राजमार्गे कृतः प्रौढः । मंडपः स्वर्गखंडवत् ॥ ९७ ॥

अर्थः-त्यां उत्तम सुगंधवाळां, मनोहर पंचरंगी पुष्पोवडे राजमार्गनी अंदर स्वर्गना प्रदेशजेवो महान् मंडप बनाव्यो. ॥ ९७ ॥

नृपादिष्टैः स्वर्णकारै--मंडपाभ्यंतरावनौ ॥ तंडुलैर्नगरालेखः । पंचवर्णैर्विनिर्मितः ॥ ९८ ॥

अर्थः-पछी ते मंडपनी अंदरनी जमीनपर राजाए हुकम करेला सोनाराए पंचरंगी तंडुलोवडे नगरनुं चित्रामण कर्युं. ॥ ९८ ॥

मध्यदेशेऽस्य सौवर्ण—पट्टकः स्थापितोऽद्भुतः ॥ सर्वंसहा प्रभुस्तूर्णं । ततः सर्वांगभूषितः ॥ ९९ ॥

पट्टहस्तिनमारुह्य । मुदागात्तत्र मंडपे ॥ कन्यां तां सुबहुलाख्यां । भृत्यैराजूहवत्तदा ॥ १०० ॥ युग्मं ॥

अर्थः—पछी ते मंडपना मध्यभागमां सुवर्णनो एक अद्भुत पाट स्थापवामां आव्यो. त्यारबाद राजा सर्व शरीरे विभूषित

थइने, ॥९९॥ पोताना पट्टहस्तीपर बेसी हर्षपूर्वक तुरत ते मंडपमां आव्यो, अने पछी तेज समये तेणे पोतानी ते सुबहुलानामनी पुत्रीने पोताना नोकरोमारफते त्यां बोलावी. ॥ १०० ॥ युग्मं ॥

**सुखासनसमासीना । ततः स्त्रीवृंद सुंदरा ॥ लोकैरादर्शनीयश्रीः । प्रापैषा तत्र कन्यका ॥ १ ॥**

अर्थः—पछी पालखीमां बेठेली, तथा स्त्रीओना समूहोमां मनोहर देखाती, तथा लोकोने जोवालायक शोभावाळी ते राजकन्या त्यां आवी पहोंची. ॥ १ ॥

**निवेश्य तां कनीं पट्टे । भूपालांतःपुरस्त्रियः ॥ ततः सुमंत्रितजलैः । शुभैरस्नपयन्मुदा ॥ २ ॥**

अर्थः—पछी राजानी राणीओए ते कन्याने ते सुवर्णपट्टपर बेसाडीने मंत्रेला उत्तम निर्मल जलवडे हर्षथी स्नान कराव्युं. ॥२॥

**ददुः कुलस्त्रियस्तत्र । धवलान् व्यक्तमंगलान् ॥ तथाऽवाद्यंत वाद्यानि । सुवृद्धास्तेनुराशिषः ॥ ३ ॥**

अर्थः—पछी त्यां कुलवान स्त्रीओ प्रगटरीते धवलमंगलो गावा लागी, तथा वाजित्रो वगाडवा लागी, अने वृद्ध स्त्रीओ आशीष् देवा लागी. ॥ ३ ॥

**वेद ध्वनीन् मुदा विप्राः । प्रोच्चरंतेस्म सर्वतः ॥ तस्या मज्जनकं चित्रै—रुत्सवैरित्यभूत्परैः ॥ ४ ॥**

अर्थः—वळी ब्राह्मणो हर्षपूर्वक चोतरफथी वेदमंत्रोनो उच्चार करवा लाग्या. एरीते नाना प्रकारना म्होटा उत्सवोवडे तेणीनो स्नानमहोत्सव थयो. ॥ ४ ॥

दिव्यांबरधरां दिव्य—भूषणैश्चाप्यलंकृतां ॥ न्यवीविशन्निजांके तां । प्रणतां पादयोर्नृपः ॥ ५ ॥

अर्थः—पछी दिव्य वस्त्रोनें धारण करनारी, तथा दिव्य आभूषणोवडे अलंकृत थयेली, अने (आवीमे) चरणोमां नमेली एवी ते कन्याने राजाए पोताना खोळामां बेसाडी. ॥ ५ ॥

एवं स्वकीयकन्याया । रूपेणानुपमेन च ॥ अमेयादेयरम्येण । सौंदर्येण च शालिना ॥ ६ ॥
मंडपस्य विचित्राभी—रचनाभिः सुचारुभिः ॥ प्रेक्षणाद्यैः क्षणैर्लोका—लोकनीयैश्च सर्वतः ॥ ७ ॥
दत्तामितेष्टतुष्टानां । बंधूनां भूरि शोभया ॥ वाद्यमानमहावाद्यै—र्गगने गर्जति स्फुटं ॥ ८ ॥
मुख्यं कंचुकिनं स्वीय—माक्षिप्तहृदयो नृपः ॥ सस्मितः पृच्छतिस्मेति । सुप्रसन्नः पुरः स्थितं ॥ ९ ॥

अर्थः—एरीते पोतानी पुत्रीना अनुपमरूपथी, तथा अमाप अने आदर करवालायक, तथा मनोहर, अने उत्तम एवी तेणीनी सुंदरताथी, ॥ ६ ॥ तेमज न्हाना प्रकारनी ते मंडपनी अतिमनोहर रचनाथी, अने चोतरफथी लोकोने जोवालायक थतां नाटकआदिक महोत्सवोथी, ॥ ७ ॥ तथा प्रमाणरहित वांछित दान आपवाथी खुशी थयेला बंधुजनोनी अति शोभाथी, तथा वागतां एवां महान् वाजित्रोथी प्रगटरीते आकाश गाजी उठवाथी, ॥ ८ ॥ मनमां अभिमाननो आवेश आववाथी राजाए पासे उभेला मुख्य कंचुकीने खुश मिजाजमां आवी हसीने पूछ्युं के, ॥ ९ ॥ चतुर्भिः कलापकं ॥

राज्यां तराण्यहो दौत्य—कार्ये संगच्छतानिशं ॥ वदेदृग्भवता क्वापि । ददृशे मज्जनोत्सवः ॥ १० ॥

अर्थः—अहो! हे कंचुकि! तुं हमेशां दूतसंबंधी कार्यप्रसंगे बीजां राज्योमां जाय छे, तेथी कहे के तें आवो स्नात्रमहोत्सव क्यांय पण जोयो छे? ॥ १० ॥

नत्वाह कंचुकी भूपं । स्वमौलिरचितांजलिः ॥ तवाज्ञयान्यदा नाथ । मिथिलानगरीमगां ॥ ११ ॥

अर्थः—त्यारे पोताना मस्तकपर हाथ जोडीने तथा राजाने नमीने ते कंचुकीए कह्युं के, हे स्वामी! एकवखते हुं आपनी आज्ञाथी मिथिलानगरीमां गयो हतो. ॥ ११ ॥

दृष्टस्तत्र मया गेहे । श्रीमल्लेः कुंभभूपतेः ॥ अतः शतगुणश्चातु—र्मासिको मज्जनोत्सवः ॥ १२ ॥

अर्थः—त्यां में कुंभराजाने घेर श्रीमल्लीकुमारीनो आथी पण सोगणो चातुर्मासिक स्नाननो महोत्सव जोयेलो छे. ॥ १२ ॥

मल्लिनाम्नि श्रुते तत्रा—धिकारे नृपतिर्भृशं ॥ सरागस्तद्गुणान् कर्णा—तिथीन् कुर्वन्नजायत ॥ १३ ॥

अर्थः—ते वृत्तांतमां ते मल्लीकुमारीनुं नाम सांभळतांज, तेणीना गुणोने कर्णगोचर करतोथको ते राजा तेणीपर अत्यंत राग धरवा लाग्यो. ॥ १३ ॥

श्रीमल्लेः करपीडन—कृते नरेंद्रः सरागहृदयः सन् ॥ श्रीकुंभं प्रति दूतं । द्रुतं च संचालयामास ॥ १४ ॥

अर्थः—पछी रागसहित हृदयवाळा एवा ते राजाए ते श्रीमल्लिकुमारीसाथे पोताना विवाह करवामाटे तुरत पोताना दूतने ते श्रीकुंभराजातरफ रवाना कर्यो. ॥ १४ ॥

॥ इति चतुर्थनृपदूतागमनं ॥

कुरुषु ख्यातमितश्च । श्रीक्रीडापंकजैर्जनैरिभ्यैः ॥ पूर्णं गजपुरनगरं । समस्ति गजवत्प्रभूतगुणं ॥ १५ ॥

अर्थः—हवे कुरुनामना देशमां प्रख्याति पामेलुं, तथा लक्ष्मीने क्रीडा करवामाटे कमलसरखा धनवान लोकोथी भरेलुं, तथा हाथीपेठे घणा गुणोवाळुं गजपुरनामे नगर छे. ॥ १५ ॥

भूमानदीनशत्रु—र्भुंक्ते राज्यं सुदीनशत्रुरपि ॥ प्राज्यश्रिया समग्रं । हरिरिव बलिबंधनप्रवणः ॥ १६ ॥

अर्थः—ते नगरमां जेना शत्रुओ नबळा पडी गया छे एवो, तथा विष्णुनीपेठे बलिने ( बलवानने ) पण बांधवामां चतुर, एवो अदीनशत्रुनामे राजा मनोहरलक्ष्मीथी उत्कृष्टुं राज्य भोगवे छे. ॥ १६ ॥

श्रीमल्लेरनुजः श्री—कुंभसुतो मल्लदिन्नकुमरवरः ॥ मिथिलायां वरपुर्यां । समयेऽस्मिन्नजनि तेजस्वी ॥ १७ ॥

अर्थः—हवे ते मिथिलानामनी उत्तम नगरीमां ते श्रीमल्लीकुमारीनो न्हानो भाइ, अने श्रीकुंभराजानो पुत्र, एवो मल्लदिन्नानामनो कुमार आ समये महापराक्रमी थयो. ॥ १७ ॥

चित्रसभामन्येद्यु–र्निर्मापयितुं समिच्छुरात्मभटैः ॥ चित्रकरानत्यद्भुत–चित्रकरान् स च निमंत्रयति १८

अर्थः—एक दिवसे ते मल्लदिन्नकुमारने चित्रोवाळी सभा बनाववानी इच्छा थवाथी तेणे अति आश्चर्यकारक चित्रो बनावनारा चितारा‌ओने पोताना नोकरोमारफते आमंत्रण कर्युं. ॥ १८ ॥

तत्कालं चित्रकृतः । समागतान् मल्लदिन्नकुमरवरः ॥ चित्रणकृते सभायाः । समभागानर्पयत्तूर्णं ॥ १९ ॥

अर्थः–तेज समये आवेला ते चितारा‌ओने ते उत्तम मल्लदिन्नकुमारे तुरत चितरवामाटे सभाना सरखा भाग सोंपी दीधा. १९

एते चित्रकृतः स्वस्व––दत्तभागान सभाभुवः ॥ सुवर्णकैः सूक्ष्मरेखै––रम्यरूपैरचित्रयन् ॥ २० ॥

अर्थः—ते चितारा‌ओ पोतपोताने सोंपेला सभामंडपना भागोने उत्तम रंगोवाळां, तथा सूक्ष्म रेखा‌ओवाळां मनोहर चित्रोवडे चितरवा लाग्या. ॥ २० ॥

तेष्वेकश्चित्रकरा–र्भको युवा कश्चिदमरलब्धवरः ॥ स्त्रीदेहदेशमात्रे । दृष्टे चित्रयति मूर्तिमपि ॥ २१ ॥

अर्थः—हवे ते चितारा‌ओमां एक कोइ चितारानो जे युवान पुत्र हतो, तेने देवतरफथी वरदान मळ्युं हतुं, अने तेथी ते कोइ स्त्रीना शरीरनो जरा कंइं भाग देखावाथी, ते स्त्रीनुं सघळुं सत्य स्वरूप चितरी कहाडतो हतो. ॥ २१ ॥

तेनान्येद्युर्दीप्तः । श्रीमल्लेर्यवनिकांतरस्थायाः ॥ दृष्टः पादांगुष्ठो । रम्यो माणिक्यवद्रुचिरः ॥ २२ ॥

अर्थः—एक दिवसे ते चिताराए पडदानी अंदर रहेली ते मल्लीकुमारीनो मनोहर, तथा माणिक्यनीपेठे चळकतो पगनो अंगुठो दीठो. ॥ २२ ॥

तद्दर्शनादशेषं । श्रीमल्ले रूपमद्भुतं तेन ॥ रचयांचक्रे भित्तौ । सुवर्णकैरवितथमिवाशु ॥ २३ ॥

अर्थः–ते अंगुठो जोवाथी तेणे ते श्रीमल्लीकुमारीनुं तुरतज खरेखरुं अद्भुत स्वरूप मनोहर रंगोवडे भिंतमां चितरी कहाडयुं.

विज्ञपयंतिस्म मुदा । सभामशेषां च चित्रयित्वा ते ॥ कुमराया यं तेषां । प्रसाददानं ददौ कुमरः ॥२४॥

अर्थः—पछी तेओए समस्त सभा चितरीने हर्षथी ते हकीकत राजकुमारने निवेदन करी, तेथी ते कुमारे पण खुशी थइने तेओने इनाम आप्यां. ॥ २४ ॥

प्रातःकृत्यं कृत्वा । कृतशंगारोऽन्यदा कुमारेंद्रः ॥ आगाच्चित्रसभां सह । धात्र्या प्राणप्रियायुक्तः ॥ २५ ॥

अर्थः—पछी एक दिवसे ते राजकुमार प्राभातिक कार्य कर्याबाद सर्व शृंगार धारण करीने धावमातासाथे पोतानी स्त्रीसहित ते सभा मंडपमां आव्यो. ॥ २५ ॥

वापीकूपसरोंबुधि—नगरनगगजेंद्रतुरंगरूपाणि ॥ वनघनविमानस्यंदन—पद्मस्त्रीपुंसमिथुनानि ॥ २६ ॥

इत्याद्यनेकचित्राण्य—द्भुतकारीणि नेत्रयोः पश्यन् ॥ श्रीमल्लिचित्ररूपं । दूरादालोकत कुमारः ॥ २७ ॥

अर्थः—त्यां वाव, कूवा, तळाव, महासागर, नगर, पर्वत, हाथी, तथा घोडानां चित्रो, तेम वन, वादळां, विमान, रथ, कमळ, अने स्त्रीपुरुषोनां जोडलां, ॥ २६ ॥ इत्यादि अनेक चित्रो, के जे आंखोने आश्चर्य उपजावतां हतां, तेओने जोतांथकां ते राजकुमारे दूरथीज ते श्रीमल्लीकुमारीनुं चितरेलुं स्वरूप जोयुं. ॥ २७ ॥ युग्मं ॥

**तत्तद्वर्णकयोगा–द्रेखाणामपि विशिष्टतरभवनात् ॥ कुमरस्य सत्यमल्ले–र्भ्रांतिरभूत् प्रस्फुटं च तदा ॥२८॥**

अर्थः––ते ते रंगोना योगथी, तथा तेनी रेखाओना उमदापणाथी ते राजकुमारने ते वखते प्रगटरीते "अहीं खरेखर मल्लीकुमारी पोतेज उभी छे" एवी भ्रांति थइ. ॥ २८ ॥

**सत्वरमेव निवृत्तः । पश्चाद्भूपांगजः सलज्जमनाः ॥ धात्री तमथोऽवादी–न्मधुरवचः प्रेमपूरेण ॥ २९ ॥**

अर्थः––त्यारे ते राजकुमार मनमां लज्जा पामीने तुरतज त्यांथी पाछो वळ्यो, त्यारे ते धावमाताए प्रेमना उभराथी तेने मधुर वचनथी कह्युं के, ॥ २९ ॥

**वत्स सभां परिपूर्णां । कथं ह्यनालोक्य यासि पश्चात्त्वं ॥ समरभुवं कातर इव । वैरिभिया कुमारेंद्र ॥३०॥**

अर्थः–––हे वत्स ! हे कुमारेंद्र ! वैरिना डरथी कायरसुभट जेम समरांगणनी भूमि छोडी जाय, तेम तुं संपूर्ण सभामंडप जोयाविनाज पाछो केम चाल्यो जाय छे ? ॥ ३० ॥

**कुमरः प्राहांब मम । स्वसा पुरो ज्यायसी स्वयं ह्यास्ति ॥ दैवतगुरुवत्पूज्या । पाज्यश्रीर्मल्लिरिति नाम्ना ॥३१॥**

अर्थः-त्यारे ते राजकुमारे कह्युं के, हे माताजी! देवगुरुनीपेठे पूजवालायक, तथा उत्तम शोभावाळी मल्लीनामनी म्हारी म्होटी बेहेन पोते आगळ उभेली छे. ॥ ३१ ॥

निर्लज्जस्तद्दृष्टौ । यामि कथं प्रियकलत्रयुग् मातः ॥ इति तेनोक्ते युक्ते । धात्री नृपनंदनमुवाच ॥३२॥

अर्थः--माटे हे माताजी! तेणीनी नजरआगळ आ प्रिय स्त्रीसहित निर्लज्ज थइने हुं केम जाउं? एरीते तेणे योग्य वचन कहेवाथी ते धावमाताए ते राजकुमारने कह्युं के, ॥ ३२ ॥

स्वच्छ मते वत्सेयं । न वर्तते श्रीमती स्वयं मल्लिः ॥ किंतु तदीयं रूपं । चित्रकृतेदं कृतमपूर्वं ॥ ३३ ॥

अर्थः-हे स्वच्छ बुद्धिवाळा वत्स! आ श्रीमती मल्लिकुमारी पोते नथी, परंतु चिताराए आ तेणीनुं अनुपम स्वरूपज चितरेलुं छे.

तद्वाक्यश्रवणादनु-कोपाकुलितोऽवदत्कुमारवरः ॥ दुर्बुद्धिः कः शिल्पी । कटाक्षितः किल कृतांतेन ॥३४॥

अर्थः—ते वचन सांभळवाबाद क्रोधातुर थयेला ते कुमारेंद्रे कह्युं के, खरेखर यमराजे (पोताना) सपाटामां लीधेलो एवो ते कयो दुर्मति चितारो छे? ॥ ३४ ॥

स्थानेऽत्र सुरतलीला-कृति योग्ये मम लिलेख रूपमिदं ॥ ज्येष्टभगिन्या दैवत-गुरुरूगाया जडो यस्तु॥३५॥

अर्थः—के जे मूर्ख चिताराए मारा आ भोगविलास करवायोग्य स्थानमां देवगुरुसरखी पूज्य, एवी मारी म्होटी व्हेननुं आ स्वरूप चितर्युं छे! ॥ ३५ ॥

निजभृत्यानित्याह । क्रोधाध्मातः स भूमिपतिपुत्रः ॥ येन कृतं रूपमिदं । स हन्यतां चित्रकृत्तूर्णं ॥ ३६ ॥

अर्थः—पछी क्रोधथी धमधमी रहेला ते राजपुत्रे पोताना नोकरोने एम कह्युं के, जेणे आ स्वरूप चितर्युं छे, ते चिताराने तुरत मारी नाखो ? ॥ ३६ ॥

भृत्यैस्तैस्तत्कालं । स तु चित्रकरांगजः करे धृत्वा ॥ वधहेतोर्वध्योर्व्या—मानीतः कंपमानतनुः ॥ ३७ ॥

अर्थः—पछी ते नोकरो तो तुरतज कंपायमान शरीरवाळा ते चितारानां पुत्रने हाथे पकडीने मारीनाखवामाटे वध करवानी जग्याए लाव्या. ॥ ३७ ॥

संभूय ततश्चित्र—काराः किलबहुधनं समर्प्यैतान् ॥ भृत्यान् क्षणं विलंब्य । प्रापुः कुमरांतिके सद्यः ॥३८॥

अर्थः—पछी ते सघळा चिताराओ एकठा थइने, राजकुमारना ते नोकरोने खरेखर घणुं द्रव्य आपीने, तथा थोडीवार थोभावीने तुरत ते राजकुमारपासे गया. ॥ ३८ ॥

कृत्वा प्राभृतमुचितं । सदाशिषा तेऽथ वर्धयित्वा च ॥ प्राहुस्तं कुमरेंद्रं । मृदुवाण्या योजितां जलयः ॥३९॥

अर्थः—पछी त्यां योग्य भेट धरीने, तथा उत्तम आशिषथी वधावीने, हाथ जोडी मिष्ट वाणीथी तेओए ते राजकुमारने विनंति करी के, ॥ ३९ ॥

श्रीमन्मल्ले रूपं । चित्रकृता येन चित्रितं नाथ ॥ गीर्वाणवरस्तस्ये—दृशो वरीवर्ति कीर्तिगृहं ॥ ४० ॥

अर्थः—हे स्वामी ! जे चिताराए श्रीमतीमल्लीकुमारीनुं जे आ स्वरूप चितर्युं छे, ते चिताराने कीर्तिना स्थानसरखुं देवे आपेलुं एवुं वरदान छे के, ॥ ४० ॥

**यस्य प्रदेशमात्रं । पश्यति रूपस्य चित्रकर एषः ॥ सम्यग्व्यंजनलक्षण–युक्तं तद्रूपमालिखति ॥ ४१ ॥**

अर्थः—ते चितारो जे कोइना स्वरूपनो एक किंचितमात्र भाग जुए छे, तेनुं ते सत्यपणे मश, तिलकआदिक लक्षणोवाळुं संपूर्ण स्वरूप चितरी शके छे. ॥ ४१ ॥

**तेनांगुष्ठः स्पष्टं । विलोकितो यवनिकांतरे मल्लेः ॥ अलिखद्यथास्थितं त–द्रूपं स खलु स्वभावेन ॥४२॥**

अर्थः—हवे ते चिताराए पडदानी अंदर रहेली मल्लीकुमारीनो अंगुठो प्रगटरीते जोयेलो छे, अने तेथी स्वभाविकपणेज तेणे खरेखर तेणीनुं यथास्थित सत्य स्वरूप चितरेलुं छे. ॥ ४२ ॥

**दंडोऽस्मै दीयतां देव । वधं मुक्त्वेतरस्ततः ॥ शिल्पवृत्त्या वयं येन । जीवामस्त्वत्प्रसादतः ॥ ४३ ॥**

अर्थः—माटे हे स्वामी ! ते चिताराने आप देहांतदंड शिवायनो बीजो दंड करो ! केमके अमो तो आपनी कृपाथी आवां चित्रामणो करीने आजीविका चलावीये छीये. ॥ ४३ ॥

**किंचिदुपशांतकोप—स्तेषामिति कोमलैर्वचोभिरयं ॥ दक्षिणहस्तांगुष्टं । तस्याछेदयदथ कुमारः ॥ ४४॥**

अर्थः—एरीतनां तेओनां कोमल वचनोथी कंईक शांत थयो छे क्रोध जेनो, एवा ते राजकुमारे ते चितारांना जमणा हाथनो अंगुठो कपावी नाख्यो. ॥ ४४ ॥

पुनरपि तं निर्विषयं । कृतवांश्च ततः स चित्रकरपुत्रः ॥ निजजन्म मन्यमानो । नवं पुरान्निर्गतो वेगात्

अर्थः—तथा तेने देशपार कर्यो, अने तेथी ते चितारानो पुत्र पोतानो नवो जन्म आवेलो मानीने तुरत ते नगरमांथी निकळीने चालतो थयो. ॥ ४५ ॥

शकटेनादाय स्वक—गृहसारं निजकुटुंबसंयुक्तः ॥ स्तोकैर्दिवसैरागा—द्देष श्रीहस्तिनानगरं ॥ ४६ ॥

अर्थः—पछी ते चितारो पोताना घरनी सारसार वस्तु गाडामां भरीने पोताना कुटुंबसहित थोडा दिवसोमां श्रीहस्तिनापुरनगरीमां आव्यो. ॥ ४६ ॥

सज्जीकृत्य ततोऽसौ । चित्रफलकं फलाभिलाषकरः ॥ वामकरांगुष्ठेना—लिलेख मल्लेर्वरं रूपं ॥ ४७ ॥

अर्थः—पछी फल मलवानी इच्छा राखनारा ते चिताराए एक चित्रपट तैयार करीने, तेमां डाबा हाथना अंगुठाथी ते मल्लीकुमारीनुं उत्तम स्वरूप चितर्युं. ॥ ४७ ॥



आदाय चित्रफलकं । गुप्तं नृपपर्षदं जगामैषः ॥ प्राभृतमुचितं मुक्त्वा । ननाम भूमिपतिं च ततः ॥४८॥

अर्थः—पछी ते चितारो गुप्तरीते ते चित्रपट लइने राजानी सभामां गयो, तथा योग्य भेट धरीने ते त्यांना राजाने नम्यो. ४८

**भूमानपृच्छदेनं । जन्मस्थानागमादिकं सौम्यः ॥ सर्वं निजवृत्तांतं । स चित्रकृतं जगौ सम्यग् ॥ ४९ ॥**

अर्थः—त्यारे ते राजाए प्रसन्न थइने तेना जन्मस्थान, तथा आगमन आदिक संबंधी वृत्तांत तेने पूछ्यो, त्यारे ते चिताराए पण पोतानो खरेखरो सघळो वृत्तांत तेने कही संभळाव्यो. ॥ ४९ ॥

**संबंधेऽत्र नरेंद्रः । श्रुत्वा श्रीमल्लिनाम सौख्यकरं ॥ रागं बिभ्रत्तदुपरि । तमपृच्छन्मल्लिरूपगुणं ॥ ५० ॥**

अर्थः—ते वृत्तांतमां ते मल्लीकुमारीनुं सुखकारक नाम सांभळीने तेणीप्रते रागने धारण करनारा ते राजाए ते चितारानेते मल्लीकुमारीनां रूप अने गुणसंबंधी वृत्तांत पूछ्यो. ॥ ५० ॥

**तच्चित्रफलकं प्रादुः—कृत्य भूमिपतेः करे ॥ सोऽदात्तद्रूपमालोक्य । भूपो विस्मयमागमत् ॥ ५१ ॥**

अर्थः—त्यारे ते चिताराए ते चित्रपट प्रगट करीने राजाना हाथमां आप्युं, त्यारे तेणीनुं स्वरूप जोइने राजातो आश्चर्यज पाम्यो. ॥ ५१ ॥

**खेचरी किन्नरी किंवा । सुरी वालिखितात्व भोः ॥ तादृशी विद्यते लोके । नृस्त्रीत्युक्तः स उक्तवान् ॥५२॥**

अर्थः—शुं आ चित्रपटमां कोइ विद्याधरीनुं, किन्नरीनुं के कोइ देवीनुं स्वरूप तें चितर्युं छे? शुं आ जगतमां आवी कोइ मनुष्यस्त्री छे? एम राजाए पूछवाथी ते चिताराए कह्युं के, ॥ ५२ ॥

मल्लेराकारमात्रं हि । भूपते चित्रितं मया ॥ केन वर्णयितुं तस्या । मुख्यं रूपं च शक्यते ॥ ५३ ॥

अर्थः—हे राजन्! में तो फक्त ते मल्लीकुमारीनो आकारज चित्रेलो छे, बाकी तेणीना मुख्य स्वरूपनुं तो वर्णन पण कोण करी शके तेम छे? ॥ ५३ ॥

प्रीतस्तद्वचसा श्री—अदीनशत्रुर्नरेश्वरस्तूर्णं ॥ व्यालोकत तद्रूपं । पुनः पुनः श्लाघ्यमानोंतः ॥ ५४ ॥

अर्थः—ते चितारानां वचनथी तुरत खुशी थयेलो ते अदीनशत्रु राजा हृदयमां प्रशंसा करतोथको वारंवार ते स्वरूपने जोवा लाग्यो. ॥ ५४ ॥

नृपतिश्चित्रकरं तं । संतोष्य प्रीतिदानतोऽभ्यधिकं ॥ योग्यावासं दत्वा । निजनगरेऽवासयन्मुदितः ॥५५॥

अर्थः—पछी खुशी थयेला राजाए ते चिताराने प्रीतिदानपूर्वक अधिक रीते खुशी करीने, तथा उचित मकान आपीने तेने पोताना नगरमां वसाव्यो. ॥ ५५ ॥

श्रीमल्लिपाणिपीडन—समीहया कुंभभूमिपालाय ॥ दूतं मिथिलापुर्या—मचालयत् सत्वरं भूपः ॥ ५६ ॥

अर्थः—पछी ते राजाए ते श्रीमल्लीकुमारीसाथे पोतानां लग्न करवानी इच्छाथी तुरत मिथिलानगरीप्रते कुंभराजापासे जवाने दूतने चालता कर्या. ॥ ५६ ॥

॥ इति पंचमभूपदूतागमनं ॥

इतः पंचालदेशेऽस्ति । कांपील्यपुरपत्तनं ॥ जितशत्रुर्महीपाल—स्तत्र राज्यं प्रशास्ति च ॥ ५७ ॥

अर्थः–हवे पंचालनामना देशमां कांपील्यपुरनामनुं नगर छे, अने त्यां जितशत्रुनामे राजा राज्य करे छे. ॥ ५७ ॥

सहस्त्रसंख्यास्तस्यांतः—पुर्यो वर्यगुणाश्रयाः ॥ धारिणीप्रमुखा रेजु—र्भूरिसौभाग्यभासुराः ॥ ५८ ॥

अर्थः—ते राजाने उत्तम गुणोना आश्रयवाळी, अने सौभाग्यथी शोभिती धारिणीआदिक एक हजार राणीओ शोभती हती.

मिथिलायां तदा पुर्यां । वर्यायां दिव्यसंपदा ॥ सत्परिव्राजिका तत्र । दाक्षीत्यस्ति जनप्रिया ॥ ५९ ॥

अर्थः––हवे ते समये दिव्य संपत्तिथी मनोहर एवी ते मिथिलानगरीमां दाक्षीनामनी एक लोकप्रिय परिव्राजिका वसे छे.

स्थापयंती नृणामग्रे । धर्मं शौचमयं मुदा ॥ सा भ्रमत् क्षितिपामात्य––मुख्यगेहेषु सर्वदा ॥ ६० ॥

अर्थः—ते परिव्राजिका लोकोसमक्ष हर्षथी शौचमय स्नानआदिक धर्मनुं स्थापन करतीथकी हमेशां राजा तथा मंत्रीआदिकना घरोमां भमती हती. ॥ ६० ॥

सान्यदा सपरीवारा । कुंडिकादंडमंडिता ॥ सखीभिर्निभृतं श्रीम––न्मल्लेर्गेहमुपागमत् ॥ ६१ ॥

अर्थः—एक दिवसे ते परिव्राजिका पोताना परिवारसहित कमंडल तथा दंडथी शोभिती थइथकी, सखीओथी भरेला श्रीमती मल्लीकुमारीना मेहेलमां आवी. ॥ ६१ ॥

भुवि जलाभिसिक्तायां । कुशोपरि निजासनं ॥ सहानीतं निवेश्यैव । सा तत्कालमुपाविशत् ॥ ६२ ॥

अर्थः–पछी जळथी छंटकाव करेली जमीनपर दर्भ पाथरीने, तेपर साथे लावेलुं आसन बिछावीने ते परिव्राजिका तुरत त्यां बेठी.

श्रीमल्लेरपि लोकाना––मिवाग्रे सर्ववेदिनः ॥ विचारं धर्मसत्कं सा । प्रारेभे वक्तुमादरात् ॥ ६३ ॥

अर्थः–जेम लोकोनी पासे, तेम ते सर्वज्ञ एवा पण मल्लीकुमारीनी पासे ते परिव्राजिका आदरसहित धर्मसंबंधी विचार कहेवा लागी.

ज्ञानत्रयवती मल्लि––राह त्वं सुभगे वद ॥ स्वर्गादिसुखकृद्धर्मः । किंमूलो वः प्रकीर्त्यते ॥ ६४ ॥

अर्थः—त्यारे त्रण ज्ञानवाळां ते मल्लीकुमारीए तेणीने कह्युं के, हे सुभगे! तुं कहे के, स्वर्गआदिकनुं सुख आपनारा एवा तारा धर्मनुं मूळ शुं छे? ॥ ६४ ॥

मूढात्मा सावदन्मल्ले । शौचमूलः सुयुक्तिमान् ॥ दानादिगुणभूषाकृ—द्धर्मोनः स्थापनोचितः ॥ ६५ ॥

अर्थः—त्यारे मूढ बुद्धिवाळी ते परिव्राजिका बोली के, हे मल्लीकुमारी! उत्तम युक्तिवाळा, तथा दानआदिक गुणोवडे शोभा करनारा, अने स्थापवालायक एवा अमारा धर्मनुं मूळ (स्नानआदिकथी) पवित्र थवारूप छे. ॥ ६५ ॥

यत्किंचिज्जायते वस्त्रं । मलिनं तन्मृदा यथा ॥ लिप्त्वा प्रक्षाल्यमानं स–ज्जलेन विमली भवेत् ॥ ६६ ॥

अर्थः—जे कंइ वस्त्र मलीन थाय छे, ते वस्त्रने जेम क्षारथी लींपीने जलवडे धोवाथी निर्मल थाय छे, ॥ ६६ ॥

स्नानादिशौचतः क्षिप्त—पापपंकमलोत्करः ॥ एवं स्याद्विमलो जीवः । स्पष्टं बाह्यनिदर्शनात् ॥ ६७ ॥

अर्थः—एरीते स्पष्टपणे बहारना दृष्टांतथी स्नानआदिकना पविम्रपणाथी पापोरूपी कादवना मेळनो समूह दूर थवाथी, आ जीव पण निर्मळ थाय छे. ॥ ६७ ॥

मल्लिराह शुभे किंचित् । श्रूयतां वचनं मम ॥ रुधिरेण विलिप्तं स्या—दंबरं मलिनं भृशं ॥ ६८ ॥

अर्थः—त्यारे ते मल्लीकुमारीए तेणीने कह्युं के, हे शुभे ! किंचित् मारुं वचन पण तुं सांभळ ? रुधिरवडे लेपन करवाथी वस्त्र वधारे मलीन थाय छे. ॥ ६८ ॥

तत्क्षाल्यमानं रक्तेन । कथं शुध्ध्यति निश्चितं ॥ एवं जीवोऽपि हिंसादि—पापंपकमलाविलः ॥ ६९ ॥
स्नानेनांबुमुखारंभ–रूपेण स्यात् कथं शुचिः ॥ मलिनीभवनं बाढं । भवेत्सावद्ययोगतः ॥७०॥ युग्मं ॥

अर्थः—वळी ते वस्त्रने रुधिरवडे धोवाथी खरेखर ते शीरीते शुद्ध थइ शके ? एरीते हिंसाआदिकना पापरूपी कादवना मेळथी लींपायेलो आ जीव पण, जळआदिकना आरंभरूप स्नानथी शीरीते पवित्र थइ शके ? केमके सावद्य योगथी तो उलटुं तेने वधारे मलीनपणुं थाय छे. ॥ ६९ ॥ ७० ॥ युग्मं ॥

युक्तियुक्तमिदं मल्लेः । सा परिव्राजिका वचः ॥ श्रुत्वा शिश्राय मौनं द्राक् । सुतरां वक्तुमक्षमा ॥७१॥

अर्थः—ते मल्लीकुमारीनुं एवुं युक्तिवाळुं वचन सांभळीने उत्तर आपवाने असमर्थ थयेली ते परिव्राजिका तुरत पोतानीमेळेज मौन रही गइ. ॥ ७१ ॥

**मल्लेः समीपगाः सख्य—स्तदा दक्षाः परस्परं ॥ तामधोवदनांभोजां । मुखमर्कटिकापराः ॥ ७२ ॥**

**मूर्तिमत्या सरस्वत्या । स्वामिन्या नः समं जडे ॥ कथं वक्तुमलं सा त्वं । धिक्कुर्वंतीति तां च ताः ॥७३॥**

अर्थः—ते समये ते मल्लीकुमारीपासे बेठेली चतुर सखीओ परस्पर पोतानां मुख मरडीने, नीचां करेलां मुखकमलवाळी ते परिव्राजिकाने धिक्कारवा लागी के, अरे मूर्ख ! साक्षात् देहधारी सरस्वती सरखी आ अमारी स्वामिनीनीसाथे वाद करवाने तुं क्यांथी समर्थ थइ शके ? ॥ ७२ ॥ ७३ ॥ युग्मं ॥

**मिथो मल्लिसखीभिः सा । हस्यमानेति सत्वरं ॥ भृशं व्रीडाकुला गेहा—द्बहिर्दूनाथ निर्गता ॥ ७४ ॥**

अर्थः—एरीते ते मल्लीकुमारीनी सखीओवडे परस्पर हांसी कराती एवी ते परिव्राजिका अत्यंत लज्जातुर थइथकी, मनमां खेद पामीने तुरत ते मेहेलमांथी बहार निकळी गइ. ॥ ७४ ॥

**मामवहीलयेदेषा । स्वज्ञानाखर्वगर्वतः ॥ मल्लिंप्रति दधावेवं । मत्सरं सा जडाशया ॥ ७५ ॥**

अर्थः—पोताना ज्ञानना विस्तार पामता गर्वथी आ मल्लीकुमारीए मारी अवगणना करी छे, एम विचारीने ते दुर्बुद्धि परिव्राजिका तेप्रते मत्सर धारण करवा लागी. ॥ ७५ ॥

करोम्यथ निजावज्ञा--प्रतीकारमिति क्रुधा ॥ हृदि संतापमापैषा । सत्सु मत्सरिणः खलाः ॥ ७६ ॥

अर्थः—हवे आ मारी अवज्ञानो कंइंक उपाय करुं तो ठीक, एम विचारी क्रोधथी ते मनमां खेद पामवा लागी, केमके दुर्जनो सज्जनोप्रते द्वेष धरनारा होय छे. ॥ ७६ ॥

ततः परिच्छदयुता । मिथिलाया विनिर्गता ॥ श्रीकांपील्यपुरं प्राप । सा भ्रमंती भुवस्तले ॥ ७७ ॥

अर्थः—पछी ते परिव्राजिका पोताना परिवारसहित मिथिलानगरीमांथी निकळीने पृथ्वीतलपर भमतीथकी कांपील्यपुरनगरमां पहोंची. ॥ ७७ ॥

जितशत्रुनरेंद्रस्य । मंदिरं कतिचिद्दिनैः ॥ साऽप पापरता ह्यन्य—रंजनायैव तत्पराः ॥ ७८ ॥

अर्थः—पछी केटलेक दिवसे ते परिव्राजिका त्यांना जितशत्रुराजाना मेहेलमां पहोंची, केमके पापी मनुष्यो परने रंजन करवामांज तत्पर होय छे. ॥ ७८ ॥

सत्कृता सा नरेंद्रेण । स्त्रीसहस्रयुजा भृशं ॥ पूर्ववद्विधिना स्वीया--सने सोपाविशन्मुदा ॥ ७९ ॥

अर्थः—एकहजार राणीओसहित ते राजाए तेणीनो घणो आदरसत्कार कर्यो. पछी ते पण पूर्वनीपेठे विधिपूर्वक पोतानुं आसन बिछावीने हर्षथी त्यां बेठी. ॥ ७९ ॥

क्ष्मापस्तां मिष्टवाक्येन । संतोष्य प्राह सादरं ॥ यूयमार्या महद्राज—कुलानि व्रजथान्वहं ॥ ८० ॥

अर्थः—पछी राजाए मिष्ट वचनोवडे तेणीने संतुष्ट करीने आदरमानपूर्वक कह्युं के, हे आर्या! आप तो हमेशां म्होटा म्होटा राजाओना दरबारमां जाओ छो. ॥ ८० ॥

ततस्तथ्यं वदाग्रे मे । वर्तते रूपसंपदा ॥ अंतः पुराणि शस्यानि । कस्यापीदृग्विधानि भोः ॥ ८१ ॥

अर्थः—माटे तमो मारीपासे सत्य बोलजो के रूपनी संपत्तिवडे आवी प्रशंसापात्र राणीओ शुं कोइपण राजानी छे? ॥ ८१ ॥

सस्मितं प्राह स्पष्टं सा । सदर्पमिति भूभुजं ॥ नूनं त्वं नृपते कूप—दर्दुरस्य समोऽसि भोः ॥ ८२ ॥

अर्थः—एरीते ते अहंकारी राजाने तेणीए हास्यसहित स्पष्टपणे कह्युं के, हे राजन्! तुं खरेखर कूवाना देडकासरखो छे. ८२

शृणु भूप यथा कूप—वासी भेकः स्वकं पदं ॥ कोऽप्यगाधतया नूनं । मन्यते गुरु तत् सदा ॥ ८३ ॥

अर्थः—हे राजन्! तु सांभळ? जेम कूवामां वसनारो देडको पोतानां ते स्थानने हमेशां खरेखर अगाधपणाथी म्होटुं माने छे.

कोऽप्यन्यदांबुधेर्भेक—स्तत्कूपतटमागतः ॥ पृष्टः स कूपभेकेन । सहर्षमिति सत्वरं ॥ ८४ ॥

अर्थः—एक समये कोइक महासागरनो देडको ते कूआने कांठे आव्यो, त्यारे ते कूआना देडकाए तुरत हर्षपूर्वक तेने पूछ्युं के,

आगतोऽसि कुतो मित्र । स जगाद महांबुधेः ॥ पुनराह कियन्मानः । सोऽब्धिर्भो वद सत्वरं ॥ ८५ ॥

अर्थः—हे मित्र ! तुं क्यांथी आव्यो छे ? त्यारे तेणे कह्युं के, हुं महासागरमांथी आव्यो छुं. त्यारे फरीने ते कूआना देडकाए तेने पूछयुं के, ते महासागर केवडोक छे ? ते मने तुं तुरत कहे ? ॥ ८५ ॥

**महानस्तीति तेनोक्ते । क्रममेकं प्रदाय च ॥ कृत्वा रेषामिहावादी—देवं कूपस्य दर्दुरः ॥ ८६ ॥**

अर्थः—त्यारे ते महासागरना देडकाए कह्युं के, ते तो म्होटो छे, त्यारे ते कूआना देडकाए एक पगलुं भरीने, तथा त्यां रेखा करीने तेने कह्युं के, ॥ ८६ ॥

**एतावानंबुधिः किं भोः । पुनराहाब्धिदर्दुरः ॥ महीयानस्त्यतः कूप—शालूरः कोपतः पुनः ॥ ८७ ॥**

**गत्वैकस्मात्कूपकंठा—दन्यत्कंठं जगाविति ॥ वर्ततेंबुधिरेतावा—नपि किं वद दर्दुर ॥ ८८ ॥ युग्मं ॥**

अर्थः—शुं ते महासागर आवडो छे ? त्यारे फरीने ते महासागरना देडकाए कह्युं के, अरे ! तेथी तो ते क्यांयें म्होटो छे. त्यारे ते कूआनो देडको क्रोध पामीने, ॥ ८७ ॥ ते कूवाना एक कांठेथी बीजे कांठे जइने कहेवा लाग्यो के, हे दर्दुर ! तुं कहे के त्यारे शुं ते महासागर आवडो छे ? ॥ ८८ ॥ युग्मं ॥

**पुनराहाब्धिशालूर—स्तवास्मात् कूपतो हरे ॥ वचनागोचरः सोऽस्ति । वीचिमालामहत्तमः ॥ ८९ ॥**

अर्थः—त्यारे फरीने ते महासागरना देडकाए कह्युं, अरे ! कूपमंडुक ! ते मोजांओनी श्रेणिवाळो महासागरतो तारा आ कूआथी घणोज म्होटो छे, तेनी म्होटाइ वचनोथी कही शकाय तेम नथी. ॥ ८९ ॥

कूपभेकोऽवदत्क्रुद्धः । किमरे भाषसे मृषा ॥ दुष्ट निस्त्रप मत्कूपा--न्नास्ति किंचिन्महत्तमं ॥ ९० ॥

अर्थः—त्यारे ते कूपमंडुक क्रोध पामीने बोल्यो के, अरे दुष्ट ! निर्लज्ज ! तुं जूठुं शामाटे बोले छे ? आ म्हारा कूआथी कोइ पण म्होटुं स्थान छेज नही. ॥ ९० ॥

एवं भवानपि क्ष्मापा—न्येषां भूमीभुजां वरं ॥ रूपवत्प्रेयसीस्वस्र—दुहित्राद्यविलोकयन् ॥ ९१ ॥

स्वांतःपुराणि सामान्य—रूपाण्यप्यभिमानतः ॥ श्लाघसे सुतरां भूमि—कांत कांतयशोभर ॥ ९२ ॥ युग्मं ॥

अर्थः—एरीते हे राजन् ! तें पण हजु बीजा राजाओनी स्वरूपवंत राणीओ, ब्हेनो, तथा पुत्रीआदिकोने जोएली नथी, अने तेथीज हे उज्ज्वल यशना समूहवाळा राजन् ! अभिमानथी तुं सामान्य रूपवाळी एवी आ तारी राणीओने अत्यंत वखाण्या करे छे. ॥ ९१ ॥ ९२ ॥ युग्मं ॥

शृणु क्ष्मापाहमेयुषी--मिथिलायां च सांप्रतं ॥ श्रीकुंभनृपतेर्मल्ली—नाम्ना पुत्र्यस्ति विश्रुता ॥ ९३ ॥

अर्थः—वळी हे राजन् ! तुं सांभळ ? हुं हमणाज मिथिलानगरीमां गइ हती, त्यां श्रीकुंभराजानी मल्लीनामनी मख्यात पुत्री छे.

तदंगचंगिमाग्रे भो । भवतो मेदिनीपते ॥ अंतःपुरसहस्रस्य । वपुःश्रीर्लेष्ठुवद्बभौ ॥ ९४ ॥

अर्थः—अरे ! राजन् ! तेणीना शरीरनी शोभापासे तारी आ एक हजार राणीओना शरीरनी शोभा फक्त माटीना ढेफां सरखी शोभे छे. ॥ ९४ ॥

सपत्नीनां महादुःखां—बुधौ तां पातयाम्यहं ॥ इष्यतीर्ष्ययापि सा चक्रे । श्रीमल्लेर्गुणवर्णनं ॥ ९५ ॥

अर्थः—हुं ते मल्लीकुमारीने शोकोसंबंधो महान् दुःखना महासागरमां नाखुं तो ठीक, एम इर्ष्याथी इच्छीने पण तेणीए ते श्रीमल्लीकुमारीना गुणोनुं वर्णन कर्युं. ॥ ९५ ॥

सत्कृत्य भूभुजा सद्यः। सा परिव्राजिका ततः ॥ विसृष्टा सागमत् सिद्ध—प्रायं कार्यं च मन्वती ॥ ९६ ॥

अर्थः—पछी राजाए तेणीनो सत्कार करीने तुरत रजा आपवाथी ते परिव्राजिका पोतानुं कार्य प्रायें करीने सिद्ध थयेलुं मानतीथकी त्यांथी चाली गइ. ॥ ९६ ॥

श्रीमल्लेः परिणयन—स्पृहां नराधीश्वरोऽधिकां बिभ्रत् ॥ मिथिलायां श्रीकुंभं । प्रति दूतमचालयत्तूर्णं ॥९७॥

अर्थः—पछी ते श्रीमल्लीकुमारीने परणवामाटे अधिक इच्छा धारण करनारा ते राजाए मिथिलानगरीप्रते ते श्रीकुंभराजापासे तुरत दूतने रवाना कर्यो. ॥ ९७ ॥

एवं स्वस्वरथैर्मनोरथयुता दूताः षडेते ततः। संप्राप्ता मिथिलापुरीपरिसरोद्याने विधेर्योगतः ॥

एकस्मिन् दिन एव षड्ऋतुफलादिश्रीरतीवप्रिय—श्रीमत्तीर्थकरागमे सुविपिने देवानुभावाद्यथा ॥ ९८॥

अर्थः—अत्यंत प्रिय एवा श्रीमान् तीर्थंकरप्रभुना आगमनवखते वनमां दैविक प्रभावथी जेम छए ऋतुओना फलआदिकनी

लक्ष्मी आवे छे, तेम मनोरथसहित ते छए दूतो पोतपोताना रथमां बेसीने विधियोगे एकज दिवसे मिथिलानगरीनी आसपास रहेला उद्यानमां आवी पहोंच्या. ॥ ९८ ॥

॥ इति षष्ठभूपदूतागमनं ॥

॥ इति श्रीमल्लिनाथचरित्रे षड्नृपदूतागमनवर्णनो नाम द्वितीयः सर्गः समाप्तः ॥ श्रीरस्तु ॥

---

## ॥ अथ तृतीयः सर्गः प्रारभ्यते ॥

अथ मुक्त्वोद्याने निज–रथादिकं पुरीं प्रविश्यते दूताः ॥ षडपि नरेश्वरसिंह–द्वारं समुपागमन् युगपत् १

अर्थः—हवे ते छए दूतो पोताना रथआदिक सामान उद्यानमां मूकीने एकीवेळायेज राजाना दरबारमां दाखल थया. ॥१॥

भूपादेशेन तत–स्ते नीता वेत्रिणा नृपसभांतः ॥ क्लृप्तांजलयः कलयो–ज्ज्वलं प्रणेमुश्च राजानं ॥२॥

अर्थः—पछी राजानी आज्ञाथी छडीदार तेओने राजसभामां लेइ गयो, अने तेओए पण हाथ जोडीने कलाओवडे निर्मल एवा ते राजाने नमस्कार कर्यो. ॥ २ ॥

तेषां महीपतीनां । दुतास्ते षडपि मल्लियाचाया ॥ संदेशान् समकालं । व्यजिज्ञपन् कुंभभूपाय ॥ ३ ॥

अर्थः—पछी ते छए दूतोए ते ते राजाओना मल्लीकुमारीनी मागणीना संदेशा एकीवेळाये कुंभराजाने निवेदन कर्या. ॥ ३ ॥

**कस्मै कन्यामेनां । दद्दे च कस्मै न चेत्यमर्षवशात् ॥ श्रीमत्कुंभक्ष्माभृ—द्दूतानेवं जगौ कुपितः ॥ ४ ॥**

अर्थः—आमांथी आ कन्या कोने देउं? अने कोने न देउं? एरीतना अमर्षने लीधे क्रोध पामेला ते कुंभराजाए ते दूतोने एम कह्युं के, ॥ ४ ॥

**भूषणमेषा राज्ञां । यांचाविगलितविवेकरत्नानां ॥ हास्येनाप्येकस्मै । मल्लिकनीं नैव दास्यामि ॥ ५ ॥**

अर्थः—याचनाथी दूर थयेल छे विवेकरूपी रत्नो जेनां एवा आ राजाओमांथी कोइने पण हुं आभूषणसरखी मल्लीकुमारी आपीश नही. ॥ ५ ॥

**दूतास्ते प्रतिषिद्धा । इत्यपमानेन कर्षिताः पुर्याः ॥ सर्वे स्वं स्वं स्थानं । जग्मुर्भग्नोद्यमास्तूर्णं ॥ ६ ॥**

अर्थः—एरीते ना पाडवाथी अपमान पामेला ते सघळा दूतो नगरथी बहार निकळीने, पोताना उद्यममां निराश थयाथका तुरत पोतपोताने स्थानके गया. ॥ ६ ॥

**स्वस्वपुरंप्रति दुताः । प्रत्यावृत्ताः षडप्यमी तूर्णं ॥ स्वस्वामिनः समीपं । प्रापुः स्तोकैर्दिनैरेव ॥ ७ ॥**

अर्थः—पछी ते छए दूतो तुरत त्यांथी पोतपोताना नगरप्रते पाछा वळ्या, अने थोडाज दिवसोमां पोतपोताना स्वामीओपासे आवी पहोंच्या. ॥ ७ ॥

स्वस्वावज्ञापूर्वं । मल्लिकनीपाणिपीडननिषेधं ॥ स्वस्वामिनां पुरस्ता—द्दूना दूताः शशंसुस्ते ॥ ८ ॥

अर्थः—पछी ते दुभायेला दूतोए पोतपोतानुं थयेलुं अपमान जणावीने, ते पोतपोताना स्वामीओने मल्लीकुमारीनो विवाह तेओसाथे नही करवानुं वृत्तांत कही संभळाव्युं. ॥ ८ ॥

वसुधाधिपास्ततस्ते । सर्वेऽपि क्रोधदुर्धराः संतः ॥ वार्तामेवं चक्रुः । परस्परं दूतसंचारात् ॥ ९ ॥

अर्थः—पछी ते सघळा राजाओ क्रोधथी उद्धत थयाथका परस्पर दूतो मोकलीने एवी सलाह करवा लाग्या के, ॥ ९ ॥

भो भोः कुंभनृपोऽयं । साम्राज्यभुजाबलेन दर्पिष्णुः ॥ कुरुतेऽवहेलनामिति । धिगात्मनामतिबलिष्ठानां १०

अर्थः—अरेरे ! धिक्कार छे के, आ कुंभराजा पोतानां राज्य तथा भुजाना बलथी गर्विष्ट थइने, अति बलवान् एवा जे आपणे, तेओनी आरीते अवगणना करे छे. ॥ १० ॥

तदयं निग्रहमर्हति । नूनं स्वबलेन किल समग्रेण ॥ क्रियते संभूय ततः । कुंभंप्रत्यात्मभिर्यात्रां ॥ ११ ॥

अर्थः—माटे खरेखर ते शिक्षा करवाने लायक छे, अने तेथी आपण सर्वेए साथे मळीने आपणां सर्व लश्करसहित ते कुंभराजापर हल्लो करवो. ॥ ११ ॥

इति निश्चित्यावनिपां । सज्जीकृत्यात्मसैन्यसामग्रीं ॥ घननिःस्वाननिनादै—स्तन्वंतो जर्जरं गगनं ॥ १२ ॥

अर्थः—एरीतनो निश्चय करीने ते छए राजाओ पोतपोताना सैन्यनी सामग्री तैयार करीने गंभीर रणडंकाओना ध्वनिओवडे आकाशने जर्जरित करवा लाग्या. ॥ १२ ॥

**ततः सन्नह्य पट्टेभ—मारुह्य षडमी नृपाः ॥ स्वस्वेभ्यो नगरेभ्यस्ते । निर्ययुः शुभवासरे ॥ १३ ॥**

अर्थः—पछी ते छए राजाओ बखतरो पेहेरीने, तथा पट्टहस्तिओपर चडीने शुभ दिवसे पोतपोताना नगरमांथी निकळ्या. ॥१३॥

**अथ संकेतितदेशे । सहोदरा इव नृपा मिलित्वा ते ॥ निःकृत्रिममन्योन्यं । वितेनिरे स्नेहसंभारं ॥१४॥**

अर्थः—पछी ते राजाओए सगा भाइओनीपेठे संकेत करेलां स्थानमां एकठा थइने परस्पर खरेखर हृदयनो स्नेहसंबंध धारण कर्यो.

**अथ भूयसाखिला अपि । संभूय निजेन सैन्यभारेण ॥ मिथिलादेशंप्रति ते । प्रयाणकैश्चेलुरतिशीघ्रैः १५**

अर्थः—पछी तेओ सघळा एकठा थइने पोताना घणा सैन्यना समूहसहित अति उतावळां प्रयाणोवडे मिथिलानगरीना देशतरफ चालवा लाग्या. ॥ १५ ॥

**निजपतिभक्त्या रुचिरै—र्बहुदेशांतरचराचरैश्चारैः ॥ अचिरं चागत्येदं । विज्ञप्तः कुंभभूजानिः ॥ १६ ॥**

अर्थः—एवामां पोताना स्वामिनी भक्तिथी मनोहर थयेला, तथा घणा देशोमां आवागमन करनारा एवा गुप्तचरोए तुरत आवीने ते कुंभराजाने विनंति करी के, ॥ १६ ॥

**स्वामिन्नवधारय किल। जलधिरिवातिमहत्तरा शीघ्रं ॥ आक्रमंतः सैन्यै—र्भुवं समंतादमंदबलैः ॥ १७ ॥**

**षट्देशक्षितिपालाः । प्राज्यैश्वर्या बलोद्धताः संतः ॥ योध्धुं गर्वाक्रांता–स्त्वांप्रति नूनं समायांति ॥ १८ ॥**

अर्थः—हे स्वामी ! अमो जे कहीये, ते आप ध्यानमां लीयो ? खरेखर महासागरनीपेठे अति म्होटा, ते छए देशना राजाओ, महान् समृद्धिवाळा, बलवडे उद्धत थयेला, तथा मर्वथी भरेला थयाथका, चोतरफथी अति बलवान् एवां पोतानां सैन्योवडे पृथ्वीने आक्रमण करताथका खरेखर एकदम आपनापर चडी आवे छे. ॥ १७ ॥ १८ ॥ युग्मं ॥

**तद्वचनात्कुंभनृपः । स्वभुजा बलगर्वितः प्रकुपितोंतः ॥ ध्वनयामास रणार्हां । डक्कां स्वनियोगिभिस्तूर्णं**

अर्थः—ते वचनथी हृदयमां क्रोध पामेला, तथा पोताना भुजबलथी गर्विष्ट थयेला ते कुंभराजाए तुरत पोताना नोकरोमारफते संग्राममाटेनी भेरी वगडावी. ॥ १९ ॥

**श्रीकुंभनराधीश–स्ततश्चलित्वा समग्रसामग्र्या ॥ मिथिलामंडलसंधिं । ससैन्यस्तस्थौ महाशक्तिः ॥ २० ॥**

अर्थः—पछी महान् शक्तिवाळा ते श्रीकुंभराजाए सर्व सामग्रीसहित त्यांथी प्रयाण करीने मिथिलादेशना सीमाडापर सैन्यसहित पडाव नाख्यो. ॥ २० ॥

**षण्णामपि भूपानां । तेषां सैन्यानि तत्क्षणात्तत्र ॥ श्रीकुंभनृपतिसैन्य—मेतं प्रत्याययुस्तूर्णं ॥ २१ ॥**

अर्थः—एवामां तेज क्षणे त्यां आवी पहोंचेलां ते श्रीकुंभराजाना सैन्यनीसामे ते छए राजाओनां सैन्यो तुरत आवी उभां.

कथमपि राज्ञामेषां । परस्परं निजमहत्तरैः संधौ ॥ प्रकृते ततस्तु धीरा । रणभूमिमसज्जयंस्तूर्णं ॥ २२ ॥

अर्थः—पछी पोतपोताना सैन्य नायकोमारफते ते राजाओए केटलीक मुश्केलीये परस्पर संधी कर्याबाद शूरवीर सुभटो तुरत रणभूमिनुं मेदान तैयार करवा लाग्या. ॥ २२ ॥

सर्वेऽपि महीपालाः । प्रातः सन्नाहदुर्धराः संतः ॥ आजग्मुः समरभुवं । महता सैन्येन तत्कालं ॥ २३ ॥

अर्थः—पछी प्रभाते ते सघळा राजाओ बख्तरो पहेरवाथी दुर्धरथयाथका तुरत म्होटां सैन्योसहित संग्रामभूमिपर आव्या. २३

खड्गाखड्गि शराशरि–पूर्वं सेनापुरस्सरैःशूरैः ॥ प्रारब्धः संग्रामः । क्षुधितैरिव भोजनं प्रवरं ॥ २४ ॥

अर्थः—पछी क्षुधातुर प्राणीओ जेम उत्तम भोजनपर त्रुटीपडे तेम सैन्योना अग्र भागमां रहेला शूरवीर सुभटोए तलवारो, तथा बाणोवडे रणसंग्राम करवा मांड्यो. ॥ २४ ॥

स्थातुमशक्ते रणभुवि । हीनानीकस्ततोऽवसरवेत्ता ॥ श्रीकुंभक्षितिपालः। प्रत्यावृत्त्यागमत् स्वपुरीं ॥२५॥

अर्थः—पछी थोडुं सैन्य होवाथी रणभूमिमां टकवाने असमर्थ, अने अवसरनो जाण एवो ते श्रीकुंभराजा पाछो फरीने पोतानी नगरीमां आव्यो. ॥ २५ ॥

नंष्ट्वा मिथिलादुर्गं । द्रुतं प्रविष्टेऽथ कुंभभूजानौ ॥ षडपि क्ष्मापाः पृष्टा–वागत्य पुरीं रुरुधुराशु ॥ २६ ॥

अर्थः—पछी एरीते ते कुंभराजा नाशीने मिथिलानगरीना किल्लामां भरायाबाद ते छए राजाओए तेनी पाछळ आवीने नगरीने घेरो घाल्यो. ॥ २६ ॥

भूरिवैरिबलाक्रांतां । सर्वतो मिथिलापुरीं ॥ विलोक्य व्याकुलीभूता—स्तदासन्नखिला जनाः ॥ २७ ॥

अर्थः—एरीते सर्व बाजुएथी शत्रुओनां घणां सैन्योवडे घेरायेली ते मिथिलानगरीने जोइने ते समये सघळालोको गभरावा लाग्या.

ततस्ते रिपुभिर्विष्व—गारुद्धः कुंभभूपतिः ॥ पुरीरक्षाकृतेऽकार्षी—दुपायान् दुस्सहान् बहून् ॥ २८ ॥

अर्थः—पछी ते शत्रुओवडे चोतरफथी घेरायेलो ते कुंभराजा नगरीनुं रक्षण करवामाटे घणा घणा मुश्केलीभर्या उपायो योजवा लाग्यो. ॥ २८ ॥

प्राकारकपिशीर्षेषु । नियोज्य सुभटान् बहून् ॥ चिंतातुरः सभाभूमौ । तस्थिवान् कुंभभूपतिः ॥ २९ ॥

अर्थः—पछी ते कुंभराजा ते किल्लाना कोंगरांओपर घणा सुभटोने गोठवीने पोते चिंतातुर थयोथको राजसभाना मकानमां आवी बेठो. ॥ २९ ॥

सखीवृंदेन संयुक्ता । तदानीं मल्लिरागमत् ॥ आस्थानं व्यवहारेण । प्रणंतुं स्वपितुः क्रमौ ॥ ३० ॥

अर्थः—ते वखते लौकिक व्यवहारमुजब मल्लीकुमारी सखीओना समूहसहित पोताना पिताना चरणोमां नमवामाटे राजसभामां आवी. ॥ ३० ॥

प्रणमंत्यपि भूपेन । श्रीमल्लिर्व्यग्रचेतसा ॥ नालोक्यत घनप्रेम—दृशाभाष्यत नो गिरा ॥ ३१ ॥

अर्थः—एरीते नमती एवी पण ते श्रीमल्लीकुमारीप्रते ते चिंतातुर हृदयवाळा कुंभराजाए अतिप्रेमदृष्टिथी जोयुं नही, तेम तेणीने कंइ वचनथी बोलावी पण नही. ॥ ३१ ॥

स्वज्ञानेन मनस्तापं । जानंत्यपि सगौरवं ॥ वचसा कोमलेनैवं । पितरं मल्लिरालपत् ॥ ३२ ॥

अर्थः—हवे पोताना ज्ञानवडे राजाना मननो संताप जाणतां छतां पण ते मल्लीकुमारीए गौरवपूर्वक कोमल वचनवडे पोताना पिताजीने कह्युं के, ॥ ३२ ॥

तवेदृशी पितश्चिंता । चेतः का बाधतेऽधिकं ॥ स्निग्ध दृष्ट्यापि यत्त्वं मां । पूर्ववन्नावलोकसे ॥ ३३ ॥

अर्थः—हे पिताजी! आपना हृदयमां एवी ते कइ चिंता बाधा उपजावी रही छे? के जेथी आप पूर्वनीपेठे स्नेहभरेली दृष्टिथी मारीसामे पण जोता नथी. ॥ ३३ ॥

मुनिवद्भाषसे किंचित् । प्रेमगर्भगिरा न वा ॥ का चिंतास्ति ततस्तात । त्वच्चित्ते कथ्यतां मम ॥३४॥

अर्थः—अथवा मुनिनीपेठे प्रेमगर्भित वचनथी केम कंइ बोलता नथी. माटे हे पिताजी! आपना मनमां शुं चिंता छे? ते मने कहो?

उद्घाट्य नयने मल्लि—मवलोक्य पुरः स्थितां ॥ सत्कृत्येति घनस्नेहा—ज्जजल्प जगतीपतिः ॥ ३५ ॥

अर्थः–पछी आंखो उघाडीने, तथा पासे उभेली मल्लीकुमारीने जोइने, राजाए घणा प्रेमपूर्वक तेणीनो सत्कार करीने कह्युं के,

**निजवंशार्णवोल्लास––चंद्रिकाह्लाददायके ॥ वत्से षण्णां द्विषां सैन्यैः । पुरीरोधं न वेत्सि किं ॥ ३६ ॥**

अर्थः—मारा वंशरूपी महासागरने उल्लासित करवामां एक चंद्रनीपेठे आनंद आपनारी, एवी हे वत्से! आ छ शत्रुराजाओना सैन्योए नगरीने जे घेरो घाल्यो छे, ते हकीकत तुं शुं नथी जाणती? ॥ ३६ ॥

**प्रबलैः शत्रुभिर्वत्से । लुप्तं सेनाबलं मम ॥ मया करिष्यतेऽतः कि––मिति चिंतास्ति मेऽधिका ॥३७॥**

अर्थः—हे वत्से! ते अतिबलवान शत्रुओए मारां सैन्योनुं बल लुप्त करी नाख्युं छे, माटे हवे हुं शुं करीश? एरीतनी मारा मनमां घणी चिंता थयेली छे. ॥ ३७ ॥

**त्वमागतापि न ज्ञाता । चिंतातुरतया ततः ॥ श्रुत्वेति मल्लिराचख्यौ । भुवि विख्यातसद्गुणा ॥३८॥**

अर्थः—अने तेथी चिंतातुरपणावडे तारुं आगमन पण हुं जाणी शक्यो नही. ते सांभळीने जगतमां प्रख्यात सद्गुणोवाळी ते मल्लीकुमारीए कह्युं के, ॥ ३८ ॥

**तात कातरलोकार्हा । चिंता दूरे विमुच्यतां ॥ शत्रुसंधिकरी गीर्मे । द्रुतं चेत्यवधार्यतां ॥ ३९ ॥**

अर्थः—हे पिताजी! कायरलोकोने योग्य एवी चिंताने आप दूर करो? अने शत्रुसाथे संधी करावनारी मारी वाणीमते आप तुरत ध्यान आपो? ॥ ३९ ॥

एकैकस्य नरेंद्रस्य । तात दूतः पृथक् पृथक् ॥ प्रच्छन्नं प्रेष्यतामेव--मुक्त्वा वाक्यं सुकोमलं ॥ ४० ॥

अर्थः—हे पिताजी! आवीरीतनुं कोमल वचन कहीने आप ते एकेक राजाप्रते गुप्त रीते भिन्न भिन्न दूतोने मोकलो? ॥४०॥

दिनात्यये त्वमेकाकी । कस्याप्यकथयन्नृप ॥ तूर्णमेहि पुरीमध्ये । प्राकारद्वारिकाध्वना ॥ ४१ ॥

अर्थः—हे राजन्! दिवस अस्त थयाबाद कोइने पण कह्याविना तमारे किल्लानी छींडीने मार्गे तुरत नगरीनी अंदर आववुं.

गुणैर्योग्याय दास्येऽहं । श्रीमल्लिं तुभ्यमेव यत् ॥ एवं षट् भूपतीन् पुर्यां । संप्रवेशय सत्वरं ॥ ४२ ॥

अर्थः—केमके गुणोवडे करीने योग्य एवा तमोनेज हुं मल्लीकुमारी आपीश, एम कही ते छए राजाओने तमो तुरत नगरीनी अंदर दाखल करो? ॥ ४२ ॥

मोहधाम्नि नवेऽशोक-वनस्थे श्रीभराकुले ॥ तात स्थापयतान् शीघ्रं । षट्सु गर्भगृहेष्विमान् ॥ ४३ ॥

अर्थः—तथा हे पिताजी! अशोकवनमां रहेला, अने शोभाना समूहथी व्याप्त थयेला ते मोहमेहेलमां तुरत छए ओरडाओमां तेओने तुरत बेसाडो? ॥ ४३ ॥

पूः प्रतोलीः प्रदायाथ । तिष्ठेस्त्वं स्वयं पुनः ॥ रोधसज्जस्ततस्तात । भव्यं सर्वं च भावि नः ॥ ४४ ॥

अर्थः—पछी हे पिताजी! नगरीना दरवाजा बंध करीने, तेओनां सैन्योने अंदर आवतां अटकाववाने सज्ज थइ तमो पोते नगरीनी अंदर रहेजो? एटले सघलुं आपणा लाभमां थशे. ॥ ४४ ॥

ततः कुंभनृपस्तुष्टः । शिष्टपुत्र्या वचोऽमृतैः ॥ तथैव विदधे सर्वं । विलंबेत हिते हि कः ॥ ४५ ॥

अर्थः—एरीते ते उत्तम पुत्रीनां वचनरूपी अमृतवडे खुशी थयेला ते कुंभराजाए सघळुं तेवीज रीते कर्युं, केमके पोतानुं हित करवामां कोण विलंब करे ? ॥ ४५ ॥

ततः स्वजनकादेशात् । श्रीमल्लिर्निजमंदिरं ॥ भारतीव मतिप्रौढा । सखीवृंदयुता ययौ ॥ ४६ ॥

अर्थः—पछी सरस्वतीनीपेठे महान बुद्धिवाळी ते मल्लीकुमारी पोताना पितानी आज्ञाथी सखीओना समूहसहित पोताना मंदिरमां गइ. ॥ ४६ ॥

नृपाः षडपि ते दूत—गिरागत्य ततो निशि ॥ तेषु गेहेषु दिव्येषु । जाताः पर्यंकशायिनः ॥ ४७ ॥

अर्थः—पछी दूतोनां वचनोथी ते छए राजाओ नगरीमां आवीने रात्रिए ते दिव्य ओरडाओमां पलंगपर सूता. ॥ ४७ ॥

कल्ये मल्लिकन्यां नून—मुद्वक्ष्यामो वयं खलु ॥ तस्थुरित्याशयैवैते । तत्र हा रागिणां स्थितिः ॥ ४८ ॥

अर्थः—आवती काले खरेखर आपणे मल्लिकुमारीने परणीशुं, एवी आशावांधीनेज तेओ त्यां रह्या, अरेरे! कामीओनी (रागीओनी) स्थिति आवीज होय छे ! ॥ ४८ ॥

उदेति प्राग्पुण्यैर्यदि शुभमयः श्रीदिनपति—स्तदा कुर्मः पाणिग्रहणमथ मल्लेः सुखकरं ॥

भविष्यामोऽन्येभ्यः सपदि नृपतिभ्योऽधिकगुणा । इति ध्यायंतस्ते निशमतिजग्मुः कथमपि ॥ ४९ ॥

अर्थः—हवे तो अमारां पूर्व पुण्योवडे ज्यारे कल्याणकारी सूर्य उगे, त्यारे ते मल्लीकुमारीनुं सुखकारक पाणिग्रहण आपणे करीये, अने तेम करीने तुरत बीजा राजाओथी आपणे अधिक दरज्जावाळा थइशुं. एम विचारतांथकां महामुश्केलीये तेओए ते रात्रि पसार करी. ॥ ४९ ॥

॥ इति श्रीमल्लिनाथचरित्रे पूर्वमित्रषड्नृपागमनवर्णनो नाम तृतीयः सर्गः समाप्तः ॥ श्रीरस्तु ॥

॥ अथ चतुर्थः सर्गः प्रारभ्यते ॥

अथोदयाचलं भास्वा--नलंचक्रे स्फुरत्प्रभः ॥ राज्ञामेषां सहाशाभि–र्जाताः स्मेरा दिशो दश ॥ १ ॥

अर्थः—हवे स्फुरायमान कांतिवाळो सूर्य उदयाचलने शोभाववा लाग्यो, अने ते राजाओनी आशाओसाथे दशे दिशाओ विकस्वर थइ. ॥ १ ॥

राजमंडलमन्यच्च । निःश्रीकमभवत्तदा ॥ तद्राजमंडलं रेजे । परं स्वमहसोज्ज्वलं ॥ २ ॥

अर्थः—वळी बीजु राजमंडल एटले चंद्रमंडल ते वखते शोभारहित थयु, परंतु आ राजाओनुं मंडल पोतानां तेजवडे उज्ज्वल थयुंथकुं शोभवा लाग्युं. ॥ २ ॥

प्रदत्तेष्वपि गेहानां। तेषां द्वारेषु भानुभाः ॥ अंतरुद्योतयन्तूर्णं । जालिकाछिद्रराशिभिः ॥ ३ ॥

अर्थः—ते ओरडोओनां द्वारो बंध होवा छतां पण सूर्यनां किरणो जालीओना छिद्रोना समूहद्वारे तेओमां दाखल थइने तेना अंदरना भागने तुरत प्रकाशित करवा लाग्यां. ॥ ३ ॥

अथोत्थाय स्वशय्यातः। क्ष्मापास्ते षडपि स्वयं ॥ शनैः शनैः क्रमन्यासं। तन्वंतो मणियुग्भुवि ॥ ४ ॥
जालिकास्वागता दिव्य—तेजः पुंजविराजितां ॥ श्रीमल्लेः प्रतिमामेतां। दद्दशुर्गेह गर्भगां ॥ ५ ॥

अर्थः—पछी ते छए राजाओ पोतानीमेळे शय्याओमांथी उठीने, ते मणिजडित जमीनपर धीमे धीमे पगलां मांडताथका जालीओमां आवीने, दिव्य तेजना समूहथी शोभिती, तथा ते मेहेलना मध्यभागमां रहेली ते श्रीमल्लिकुमारीनी मूर्तिने जोवा लाग्या.

पुण्यलावण्यसंपत्त्या । सुरीसौभाग्यजित्वरीं ॥ प्रभासुरांगगंगाभा—मष्टापदमयीमिमां ॥ ६ ॥
विलोकयंति विस्मेर—लोचनैरतिहर्षतः ॥ मल्लिं बुबुधिरे ते च। तामेवावितथां जडाः ॥ ७ ॥ युग्मं ॥

अर्थः—पवित्र लावण्यनी संपत्तिथी देवांगनाना सौभाग्यने जीतनारी, तथा तेजस्वी शरीरथी गंगासरखी, अने सुवर्णमय एवी ते मूर्तिने, ॥ ६ ॥ ते राजाओ अत्यंत हर्षपूर्वक प्रफुल्लित चक्षुओवडे जोवा लाग्या, तथा ते मूर्खाओ ते मूर्तिनेज खरेखरी मल्लिकुमारीज मानवा लाग्या. ॥ ७ ॥ युग्मं ॥

अहो कांतिरहो रूप—महो सौभाग्यमद्भुतं ॥ एवमंतस्तोषपूर्णा । अनंदंत मुहुश्चते ॥ ८ ॥

अर्थः—अहो आ मल्लीकुमारीनी कांति केवी छे ? रूप केवुं छे ? तथा केवुं अद्भुत सौभाग्य छे, एम हृदयमां वारंवार संतोष पामताथका तेओ आनंद पामवा लाग्या. ॥ ८ ॥

ज्ञानत्रयधरा मल्लि—रस्मिन्नवसरे द्रुतं ॥ सखीशतयुता तत्र । समागाद्भूरिभूषणा ॥ ९ ॥

अर्थः—हवे ते समये त्रण ज्ञानने धारण करनारी, तथा घणा आभूषणोवाळी ते मल्लीकुमारी एकसो सखीओसहित तुरत त्यां आवी. । ९ ॥

व्ययोजयत्ततः स्वर्ण—मूर्तितश्चोर्ध्वसंस्थितं ॥ सा पद्मं प्रासरत्कोऽपि । दुर्गंधः प्रवलस्ततः ॥ १० ॥

अर्थः—पछी तेणीए ते सुवर्णनी मतिमापरथी उपर रहेलु कमळनुं ढांकणुं उघाडी नाख्युं, अने तेथी तेमांथी कोइक महान् दुर्गंध त्यां फेलावा लागी. ॥ १० ॥

अथ ते षण्महीपाला—स्तस्माद्दुर्गंधतो भृशं ॥ व्याकुला मनसि स्वीय—नासिकाः स्थगयंति च ॥ ११ ॥

अर्थः—त्यारे ते छए राजाओ ते दुर्गंधथी मनमां अत्यंत व्याकुळ थइने पोतपोतानी नासिकाओने आच्छादित करवा लाग्या.

स्थितानधोमुखीभूय । नृपान् बोधयितुं च तान् ॥ श्रीमल्लिरिदमाचख्यो । स्वच्छवात्सल्यतस्तदा ॥१२॥

अर्थः—पछी ते श्रीमल्लिकुमारी नीचुं मुख करी उभेला ते राजाओने प्रतिबोधवामाटे ते वखते पोताना निर्मल वात्सल्यभावथी एम कहेवा लागी के, ॥ १२ ॥

**पश्यंतः प्रतिमामेना—महो प्रेमवशान्नृपाः ॥ विविक्तमतयो भग्नो—त्साहाः किं संस्थिताः किल ॥ १३॥**

अर्थः—हे विवेकबुद्धिवाळा राजाओ ! प्रेमने वश थइ आ प्रतिमाने जोताथका खरेखर निरुत्साह केम थइ गया छो ? ॥१३॥

**तेऽप्याहुः सुभगे ह्यस्या । दुर्गंधं न सहामहे ॥ ततो मुखं स्वनासां च । स्थगयित्वा वयं स्थिताः ॥१४॥**

अर्थः—त्यारे तेओए पण कह्युं के, हे सुभगे ! अमो आ मूर्तिनी दुर्गंध सहन करी शकता नथी, अने तेथी अमारुं मुख अने नासिकाने आच्छादित करीने उभा छीये. ॥ १४ ॥

**श्रीमल्लिराह भो तत्त्व—बुध्ध्या हृदि विचार्यतां ॥ प्रतिमायाः स्वर्णमय्या । दुर्गंधः कथमीदृशः ॥ १५ ॥**

अर्थः—त्यारे ते मल्लीकुमारीए कह्युं के, हे राजाओ ! तमो तत्वबुद्धिथी मनमां विचारो के; आ सुवर्णमय प्रतिमामांथी आवी दुर्गंध केम प्रगटी निकळी छे ? ॥ १५ ॥

**मया प्रतिदिनं नूनं । कुर्वत्या भोजनं नृपाः ॥ क्षिप्तः कवलकोऽन्नस्य । मुखेऽस्याः सरसा भृशं ॥ १६ ॥**

अर्थः—हे राजाओ ! खरेखर हमेशां भोजन करती वेळाये आ प्रतिमाना मुखमां अतिरसथी भरेलो एकेको कोळीयो नाख्यो छे.

कवलानामहो पिंडी--भूतानां दुस्सहो भृशं ॥ दुर्गंधः प्रादुरासीत् स । यस्तु सोढुं न शक्यते॥ १७ ॥

अर्थः—अहो ते एकठा थयेला कवलोनो अति दुगंछा उपजावनारो ते एवो तो दुर्गंध प्रगटी निकळ्यो छे, के जे सहन थइ शकतो नथी. ॥ १७ ॥

तदन्नाहारपुष्टास्टग्--मांसमज्जादिधारिणः ॥ अशुचिस्थानभूतस्य । पुद्गलैरशुचिभृतैः ॥ १८ ॥
जीर्णद्रुपत्रवन्नूनं । स्त्रीशरीरस्य पातिनः ॥ रागः किं स्तूयतेऽनंत-सुखभोगाभिलाषिणा ॥ १९ ॥ युग्मं ॥

अर्थः—हवे तेवां अन्नना आहारथी पुष्ट थयेलां रुधिर, मांस तथा चरबी आदिकने धारण करनारां, अने अशुचिथी भरेलां पुद्गलोवडे अशुचिना स्थानरूप थयेलां, ॥ १८ ॥ तेमज जीर्णवृक्षना पांदडांनीपेठे अवश्य विनश्वर थनारां, एवां स्त्रीना शरीरप्रते रागने जे धारण करवो, तेमाटे अनंत सुखोना भोगनी अभिलाषावाळो शुं प्रशंसा करे ? अर्थात् नज करे. ॥ १९ ॥ युग्मं ॥

विनाशिषु प्रकृत्येव । कामभोगेष्वहो ततः ॥ मा मुधा तत्वबुध्ध्या च । सर्वथा ह्यनुरज्यत ॥ २० ॥

अर्थः—माटे अहो! स्वभावथीज विनश्वर एवा कामभोगोनेविषे तमो तत्वबुद्धिथी सर्वथा प्रकारे फोगट रागने धारण न करो ?

भवेऽभूवं तृतीयेऽस्मा--दन्यच्चतो महाबलः ॥ नृपो महाविदेहेषु । यूयः षट् सुहृदश्च मे ॥ २१ ॥

अर्थः—वळी आ भवथी पेहेलां त्रीजे भवे हुं महाविदेहक्षेत्रमां महाबलनामे राजा हतो, अने तमो छए मारा मित्रो हता. २१

प्राच्यजन्मद्वयवृत्त—मित्याद्यवितथं तदा ॥ श्रीमल्लिः प्रकटीचक्रे । तेषामप्रतिमल्लधीः ॥ २२ ॥

अर्थः—इत्यादिक कहीने ते अनुपम बुद्धिवाळी श्रीमल्लीकुमारीए ते वखते तेओनीपासे पूर्वना बन्ने भवोनुं वृत्तांत तेओने कही संभळाव्युं. ॥ २२ ॥

पुनराह जयंताख्ये । विमाने भोः सुहृद्वराः ॥ भुक्तान्यनंतसौख्यानि । युष्माभिः सुरजन्मनि ॥ २३ ॥

अर्थः—वळी तेणीए कह्युं के, हे उत्तममित्रो ! तमोए देवभवमां जयंतनामना विमानमां अनंता सुखो भोगव्यां छे. ॥ २३ ॥

किं विस्मृतानि तानीह । सौख्यानि नरजन्मनि ॥ किं न स्मरथ भोः प्राच्य—देवजातिं शुभास्पदं ॥२४॥

अर्थः—ते सुखोने तमो शुं आ मनुष्यभवमां विसरी गया ? वळी हे मित्रो ! तमो कल्याणना स्थानरूप एवा पूर्वना देवभवने केम याद करता नथी ? ॥ २४ ॥

भवांबुनिधियानाभ—मल्लिवाचा सुधाभया ॥ नृपास्ते प्रतिबुध्याद्याः । प्रतिबुद्धास्तदाधिकं ॥ २५ ॥

अर्थः—संसाररूपी महासागरमां वहाणसरखी एवी ते श्रीमल्लीकुमारीनी अमृतसरखी वाणीथी ते मतिबुद्धिआदिकराजाओ ते वखते विशेषप्रकारे प्रतिबोध पाम्या. ॥ २५ ॥

चारुणा परिणामेन । लेश्ययातिविशुद्धया ॥ क्षणादूहां प्रकुर्वाणा—स्ते प्राच्यभवमस्मरन् ॥ २६ ॥

अर्थः—पछी मनना उत्तम परिणामथी, तथा अतिनिर्मल लेश्याथी विचार करताथका ते राजाओ क्षणवारमांज पूर्वभवने याद करवा लाग्या. ॥ २६ ॥

तेषां जातिस्मृतिं मत्वो—त्पन्नामवधिबोधतः ॥ तदावासकपाटानि । श्रीमल्लिरुद्घाटयत् ॥ २७ ॥

अर्थः—पछी पोतानां अवधिज्ञानथी ते राजाओने जातिस्मरण ज्ञान उत्पन्न थयेलुं जाणीने ते श्रीमल्लीकुमारीए तेओना आवासोनां कमाड उघाडी नाख्यां. ॥ २७ ॥

ततोऽभ्येत्य नरेंद्रास्ते । मल्लिं नेमुः प्रमोदतः ॥ प्राग्भवप्रतिबद्धं हि । स्नेहं च दधतोऽधिकं ॥ २८ ॥

अर्थः—पछी ते राजाओ पूर्वभवमां बांधेला स्नेहने खरेखर अधिकपणे धारण करताथका आनंदथी आवीने ते मल्लीकुमारीने नम्या.

मल्लिराह नृपानेता—निति कोमलया गिरा ॥ श्रूयंतां भो महीपालाः । प्राग्जन्मसुहृदो मुदा ॥ २९ ॥

अर्थः—पछी ते मल्लीकुमारीए कोमल वचनथी ते राजाओने कह्युं के, हे पूर्वभवना मित्र राजाओ! तमो हर्षथी सांभळो ? २९

स्वीकरिष्येऽहमुद्विग्ना । भववासान्महाव्रतं ॥ किं करिष्यथ भो भूपा । भवंतः कथयंतु मे ॥ ३० ॥

अर्थः—हे राजाओ ! हुं तो संसारवासथी कंटाळीने महाव्रत ग्रहण करनारी छुं, माटे तमो शुं करशो ? ते मने कहो ? ॥३०॥

किं राज्ये स्थास्यथ स्वीये । किं वा लास्यथ सद्व्रतं ॥ उदाहरन्निति स्पष्टं । पृष्टास्ते भूमिवल्लभाः ॥३१॥

अर्थः—शुं तमो तमारां राज्यमांज रहेशो ? के उत्तम चारित्र लेशो ? एरीते पूछवाथी ते राजाओए स्पष्टपणे कह्युं के, ॥ ३१ ॥

मल्ले निशम्यतां पूर्व—भवे श्रीमान् महाबलः ॥ त्वमस्माकं यथैवाभू—र्विभुरस्मिंस्तथा भव ॥ ३२ ॥

अर्थः—हे मल्ली! तमो सांभळो? तमो पूर्वभवमां महाबलनामना जेम अमारा स्वामी हता, तेम आ भवमां पण तमो अमारा स्वामी थाओ? ॥ ३२ ॥

प्रतिपत्स्यते तपस्यां चे—द्भवतो भववीरसा ॥ गृहीष्यामस्तदा नूनं । मुक्त्वा साम्राज्यसंपदं ॥ ३३ ॥

अर्थः-आ संसारथी वैराग्य पामीने जो तमो दीक्षा लेशो तो अमो पण खरेखर राज्यसंपदानो त्याग करीने दीक्षा लेइशुं. ॥३३॥

नरेश्वैररिति प्रत्यु—त्तरे दत्तेऽमलाशयैः ॥ गिरं जगाद श्रीमल्लिः । सत्वरं सत्त्वरंजिता ॥ ३४ ॥

अर्थः—निर्मळ आशयवाळा ते राजाओए एरीते प्रत्युत्तर देवाथी, तेओनी हिम्मतथी खुशी थयेली ते मल्लीकुमारीए तुरत उत्तर आप्यो के ॥ ३४ ॥

यूयं मया सहैवाहो । गृहीतारो यदि व्रतं ॥ स्थापयध्वं सुतान् राज्ये । तदा रयान्नरेश्वराः ॥ ३५ ॥

अर्थः—अहो! ज्यारे तमो मारी साथेज दीक्षा लेवाना छो, त्यारे हे भूपतिओ! तमो तुरत तमारा पुत्रोने पोतपोताना राज्यपर स्थापन करो? ॥ ३५ ॥

वाक्ये कक्षीकृते तस्मिन् । प्रतिबुध्यादिभिर्नृपैः ॥ सभामाप्यानमन्मल्लि—र्जनकं जनकर्मभित् ॥ ३६ ॥

अर्थः—पछी ते प्रतिबुद्धिआदिक राजाओए ते वचन स्वीकारवाथी, लोकोना कर्मोनो नाश करनारी ते मल्लीकुमारीए राजसभामां आवीने पोताना पिताजीने नमस्कार कर्यो. ॥ ३६ ॥

**श्रीकुंभभूभुजा स्नेह—पूर्वमालिंग्य सत्वरं ॥ ज्ञाततत्प्रतिबोधेन । निर्भरं प्रीतचेतसा ॥ ३७ ॥**
**तादृग्विभूषणैर्नव्य—भोजनैश्च विवेकतः ॥ संतोषिता नरेंद्रास्ते । चेलुः स्वविषयंप्रति ॥३८॥ युग्मं ॥**

अर्थः—पछी जाणेल छे ते राजाओना प्रतिबोधनो वृत्तांत जेणे, एवा ते कुंभराजाए हृदयमां अत्यंत खुशी थइने स्नेहपूर्वक तुरत तेओने आलिंगन करीने, ॥ ३७ ॥ तेवां आभूषणोथी तथा नवांनवां भोजनोथी विवेकपूर्वक संतोषेला ते राजाओ पोतपोताना देशप्रते चालता थया. ॥ ३८ ॥ युग्मं ॥

**विपक्षरोधनिर्मुक्ता । मिथिला शुशुभेऽधिकं ॥ यथातिदुष्टरोगेभ्यो । मुक्तांगश्रीर्नृणां भृशं ॥ ३९ ॥**

अर्थः—जेम अति भयंकर रोगोथी मुक्त थयेली माणसोना अंगनी शोभा अधिक शोभे छे, तेम शत्रुओना वेराथी मुक्त थयेली ते मिथिलानगरी पण अधिक शोभवा लागी. ॥ ३९ ॥

**ब्रह्मलोकादथागत्य । द्रुतं लोकांतिकैः सुरैः ॥ श्रीमल्लेर्भक्तितो दीक्षा—कालोऽज्ञापि जिनेशितुः ॥ ४० ॥**

अर्थः—एवामां ब्रह्मलोकथी लोकांतिक देवोए तुरत आवीने भक्तिपूर्वक श्रीमल्लीनाथप्रभुने दीक्षा लेवानो समय जणाव्यो. ४०

मत्वावधेः स्वयं मल्लि—र्दीक्षाया वर्षमंतरे ॥ प्रायुंक्त हर्षतो दातुं । दानं सांवत्सरं ततः ॥ ४१ ॥

अर्थः—पछी ते मल्लीकुमारीए पोतेज अवधिज्ञानथी दीक्षानो एक वर्षनो अंतर जाणीने हर्षथी वार्षिक दान देवा मांड्युं.

सौधर्मप्रभुणा ज्ञानो—पयोगादर्हतस्ततः ॥ मत्वादिश्यत यक्षेशो । दानस्यावसरं विभोः ॥ ४२ ॥

अर्थः—पछी सौधर्मेंद्रे पोताना ज्ञानना उपयोगथी जाणीने कुबेरने प्रभुना दानना अवसरथी वाकेफ कर्यो. ॥ ४२ ॥

जृंभकानुचरास्तेन । समादिश्यंत तत्क्षणात् ॥ मल्लेर्गृहे समानेतुं । भूस्थितानमितान्निधीन् ॥ ४३ ॥

अर्थः—तेणे पण तेज क्षणे जमीनमां दाटेलां अगणित द्रव्य निधानोने श्रीमल्लीनाथप्रभुने घेर लाववामाटे पोताना अनुचर जृंभकदेवोने हुकम कर्यो. ॥ ४३ ॥

प्रावर्तयत्ततः प्रात—र्दानं सांवत्सरं जिनः ॥ अनर्गलां यथाषाढे । वृष्टिं कादंबिनी दिवि ॥ ४४ ॥

अर्थः—पछी आषाढमासमां आकाशमां रहेली मेघमाला जेम अनर्गल वृष्टि वरसे छे, तेम प्रभातमांथी ते मल्लीप्रभु सांवत्सरिक दान देवा लाग्या. ॥ ४४ ॥

ग्रामे पुरप्रतोलीषु । नगरेषु च डिंडिमाः ॥ वाद्यंत त्रिकाद्येषु । मिथिलाया ततोऽभितः ॥ ४५ ॥

अर्थः—पछी ते मिथिलादेशना गामोमां, नगरोना दरवाजाओमां, नगरोमां तथा त्रिक, चौटाआदिकोमां चोतरफ एवा पटहो वागवा लाग्या के. ॥ ४५ ॥

वांछास्ति यादृशी यस्य । स मार्गयतु तादृशं ॥ द्रव्यादिकं दरिद्रोवा । ऋणार्तो वामयी तथा ॥ ४६ ॥

अर्थः—जे कोइ दरिद्र, करजदार अथवा रोगी होय, अने तेने जेवी कंइ इच्छा होय, तेवुं द्रव्य आदिक मागी लेवुं. ॥४६॥

कल्याणकोटिं श्रीमल्लि—रष्टलक्षसमन्वितां ॥ धनं च पौरुषीं यावत् । प्रादत्त प्रतिवासरं ॥ ४७ ॥

अर्थः—एरीते ते श्रीमल्लिनाथ प्रभु हमेशां पौरुषीसुधी एकक्रोड अने आठ लाख सोनामोहोरो जेटलु द्रव्य याचकोने आपता हता. ॥ ४७ ॥

दीनानां दुःस्थितानां च । भिक्षूणा मर्थिनामथ ॥ तदेष्टभोजनं स्थाने । स्थाने प्रावर्तत प्रभोः ॥४८॥

अर्थः—ते वखते प्रभुतरफथी ठेकाणे ठेकाणे दरिद्रीओ, दुःखीओ तथा भिक्षुओ अने याचकोमाटे यथेष्ट भोजन आपवानुं शीरु करवामां आव्युं. ॥ ४८ ।

श्रीमल्लिः कल्पवल्लीतो—ऽधिकाभूद्दानकर्मणि ॥ प्रार्थितं कामितं दत्ते । विश्वेषामपरिमितं ॥ ४९ ॥

अर्थः—एरीते श्रीमल्लिनाथप्रभु दानकार्यमां कल्पवल्लीथी पण अधिक थया, केमके ते सर्वलोकोने तेओनी इच्छामुजब मागणीप्रमाणे प्रमाणरहित द्रव्यादिक आपवा लाग्या. ॥ ४९ ॥

अस्मिन् संवत्सरे पूर्णे । जीवलोके च तोषिते ॥ प्रणामपूर्वकं पित्रोः । श्रीमल्लिर्वाक्यमित्यवक् ॥ ५० ॥

अर्थः—ते वर्ष पूरुं थयाबाद, अने सर्व जीवो संतुष्ट थयाबाद ते श्रीमल्लिप्रभुए प्रणामपूर्वक पोताना मातपिताने कह्युं के,

**भवतामाज्ञया तत्र—भवतां पितरावथ ॥ गृहीष्येऽहं भवांभोधि—तारणं चरणं किल ॥ ५१ ॥**

अर्थः—हे माता पिताजी! पूज्य एवां आपनी आज्ञाथी हुं खरेखर संसाररूपी महासागरमांथी तारनारुं चारित्र ग्रहण करीश.

**श्रुत्वैतद्विगलत्प्रेमौ । बाष्पसंपूर्णलोचनौ ॥ युक्तिमत् पितरौ प्रीत्या—वोचतामिति तांप्रति ॥ ५२ ॥**

अर्थः—एवीरीतनुं ते श्रीमल्लीकुमारीनुं युक्तिवाळुं वचन सांभळीने उतरी गयेला प्रेमवाळा, तथा आंसुओवडे भरेली आंखोवाळा, तेमना मातपिता प्रीतिथी तेणीने एम कहेवा लाग्या के, ॥ ५२ ॥

**लसद्गुणमणिखाने । त्वया विश्वं यथोध्धृतं ॥ तथा पुत्रि चरित्रेण । पूर्णमात्मानमुद्धर ॥ ५३ ॥**

अर्थः—उल्लसायमान गुणोरूपी मणिओनी खाणसरखी एवी हे पुत्री! जेम तमोए जगतनो उद्धार कर्यो छे, तेम चारित्रथी संपूर्णरीते तमारा आत्मानो पण उद्धार करो? ॥ ५३ ॥

**पट्टनित्यादिशद्भृत्यान् । कुंभभूमोपतिस्ततः ॥ दीक्षाभिषेकसामग्री । श्रीमल्लेः क्रियतामहो ॥ ५४ ॥**

अर्थः—पछी ते कुंभराजाए हुशीयार नोकरोने एवो हुकम कर्यो के, अहो! आ श्रीमल्लीकुमारीना दीक्षाना अभिषेकनी सामग्री तमो तैयार करो? ॥ ५४ ॥

मृद्रूप्यहेमसद्रत्न——मयान् कुंभाननेकशः ॥ कृत्वा गंधोदकैः पूर्णान् । भो भोः कुर्वंतु सत्वरं ॥ ५५ ॥

अर्थः—माटीना, रूपाना, सुवर्णना, तथा उत्तम रत्नोना अनेक कलशोने सुगंधि जलथी भरीने, हे पुरुषो तमो तुरत तैयार करो ?

तैस्तथैव नृपादेशात् । प्रमोदाद्विहितेऽचिरात् ॥ संजातासनकंपेन । दत्तावध्युपयोगतः ॥ ५६ ॥

चारित्रावसरं मल्ले——र्मत्वा कर्तुं सुरेश्वराः ॥ तत्रागुः स्वविमानस्थाः । सुरकोटिभिरन्विताः ॥ ५७ ॥

अर्थः—पछी राजानी आज्ञाथी हर्षपूर्वक तुरत तेओए तेम कर्याबाद, आसनो कंपवाथी अवधिज्ञाननो उपयोग देवाथी श्रीमल्लिनाथप्रभुनो दीक्षा लेवानो अवसर जाणीने, तेनो महोत्सव करवामाटे इंद्रो क्रोडोगमे देवोसहित पोताना विमानोमां बेशीने त्यां आव्या. ॥ ५६ ॥ ५७ ॥ युग्मं ॥

कुंभभूपसुतादीक्षा——भिषेकायामरेश्वराः ॥ स्वर्णकुंभादि सामग्रीं । विकुर्वंति स्वभक्तितः ॥ ५८ ॥

अर्थः—पछी कुंभराजानी ते मल्लीनामनी पुत्रीना दीक्षासंबंधी अभिषेक करवामाटे ते इंद्रो पोतानी भक्तिवडे सुवर्णना कलशोआदिकनी सामग्री तैयार करवा लाग्या. ॥ ५८ ॥

तादृशांस्तावतः कुंभान् । नृपनिर्मापितेषु च ॥ न्ययोजयन् सुराधीशा—स्तत्कालं निजशक्तितः ॥५९॥

अर्थः—पछी ते इंद्रोए तेज समये पोतानी शक्तिथी तेवाज तेटलां कलशोने, राजाए तैयार करावेला कलशोनी अंदर जोडी दीधा.

समाहूय ततो मल्लिं । विस्तीर्णे रत्नमंडपे ॥ स्थापयामास भूपालः । प्रौढसिंहासने मुदा ॥ ६० ॥

अर्थः—पछी ते कुंभराजाए ते मल्लीकुमारीने बोलावीने हर्षपूर्वक विशाल रत्नमंडपमां म्होटां सिंहासनपर बेसाडी. ॥ ६० ॥

श्रीकुंभभूभुजा सार्ध—मथ सर्वेऽपि वासवाः ॥ तैः कुंभैरभिषेकं श्री—मल्लेर्भक्त्या वितेनिरे ॥ ६१ ॥

अर्थः—पछी ते सर्व इंद्रोए ते श्रीकुंभराजासाथे मळीने भक्तिपूर्वक ते कलशोवडे करीने श्रीमल्लीकुमारीने दीक्षासंबंधी अभिषेक कर्यो. ॥ ६१ ॥

केचिद्भक्त्या प्रकुर्वंति । स्वाम्यग्रे खलु नाटकं ॥ गायंति त्रिदशाः केचि—द्गीतानि मधुरस्वरैः ॥६२॥

अर्थः—केटलाक देवो भक्तिथी ते प्रभुआगळ खरेखर नाटक करता हता, अने केटलाक मधुरस्वरथी गायन गाता हता. ६२

अवादयन् सुवाद्यानि । गर्जदंबरपूर्वकं ॥ भक्तिसंभारतः पुष्प—वृष्टिं केचिद्वितन्वते ॥ ६३ ॥

अर्थः—केटलाक आकाशने गजावी मूकताथका वाजित्रो वगाडवा लाग्या, अने केटलाक भक्तिना आवेशथी पुष्पोनी वृष्टि करवा लाग्या. ॥ ६३ ॥

ततो मल्लिं निवेश्याथो—त्तराभिमुखविष्टरे ॥ परिधापयंति दिव्यांब—राण्याभरणानि च ॥ ६४ ॥

अर्थः-पछी ते श्रीमल्लीकुमारीने उत्तरसन्मुख सिंहासनपर बेसाडीने, तेमने दिव्य वस्त्रो तथा आभूषणो पहेरावषामां आव्यां.

समादिशति च क्ष्माभृ-द्विज्ञान् पुण्यान्नरांस्ततः ॥ शिबिकां सज्जयंतु श्री-मल्लेर्निष्क्रमणोचितां ॥६५॥

अर्थः—पछी ते कुंभराजाए चतुर तथा पवित्र पुरुषोने हुकम कर्यो के, आ श्रीमल्लीकुमारीने दीक्षामाटे बेसीने जवालायक पालखी तैयार करो ? ॥ ६५ ॥

शिल्पिनोऽनल्पविज्ञान—कुशला यत्नतस्ततः ॥ मणिस्तंभवरां बद्ध—तलां रत्नैरनेकधा ॥ ६६ ॥
वेदिकानृत्यदानंदि—दिव्यसौवर्णपुत्रिकां ॥ मंडपैर्मंडितां स्फार—तोरणैश्चाप्यलंकृतां ॥ ६७ ॥
विजित्वरीं विमानर्द्धेः । केतुभिः कलशैस्तथा ॥ मणिसोपानपद्धत्या । मंडितामभितः परां ॥ ६८ ॥
रचयांचक्रिरे पूतां । शिबिकां सुमनोरमां ॥ चक्रुरन्यां च शिबिका—मिंद्रादेशात्सुरा अपि ॥ ६९ ॥

अर्थः—पछी कारीगिरि करवामां अतिचतुर कारीगरोए यत्नपूर्वक मणिओना स्तंभोवडे मनोहर थयेली, अनेक प्रकारना रत्नोवडे बांधेलां तलीयांवाळी, ॥ ६६ ॥ वेदिकापर नाच करती अने आनंद उपजावती दिव्य सुवर्णनी पुतळीओवाळी, मंडपोवडे शोभिती, अने विस्तीर्ण तोरणोवडे पण शणगारेली, ॥ ६७ ॥ तथा पताका अने कलशोवडे विमानंनी समृद्धिने पण जीतनारी, तथा चोतरफथी मणिओना बांधेलां पगथीआंओनी श्रेणिथी शोभिती, विशाल, ॥ ६८ ॥ अने पवित्र मनोरमानामनी उत्तम पालखी (शिबिका) बनावी. तथा इंद्रनी आज्ञाथी देवोए पण एक बीजी पालखी बनावी. ॥ ६९ ॥ चतुर्भिःकलापकं ॥

देवैः प्रवेशितायां च । तस्यामंतर्मनोरमा ॥ स्नेहसिक्ता यथा दीप–कला कांत्याथ सा बभौ ॥ ७० ॥

अर्थः—पछी ते पालखीने देवोए अंदर दाखल करवाथी ते मनोरमा पालखी तेल पूरवाथी दीपकनी तेजनीपेठे कांतिवडे करीने दीपवा लागी. ॥ ७० ॥

ततः श्रिया प्रशस्या श्री–मल्लिः पित्रोरनुज्ञया ॥ सद्यः प्रदक्षिणीकृत्या–ऽरोहत्तां शिबिकां विभुः ॥७१॥

अर्थः—पछी शोभावडे प्रशंसा करवालायक एवा श्रीमल्लिप्रभु तुरत मातापितानी आज्ञाथी प्रदक्षिणा फरीने ते पालखीमां बेठा.

पूर्वाशाभिमुखा तत्र । मल्लिः शिश्राय विष्टरं ॥ वक्त्रेंदुकिरणोद्योति—चामरादिकवैभवा ॥ ७२ ॥

अर्थः—पछी (पोताना) मुखरूपी चंद्रना किरणोवडे तेजस्वी थयेलां चामरआदिकना वैभववाळा ते श्रीमल्लिनाथप्रभु ते पालखीमां पूर्वसन्मुख सिंहासनपर बेठा. ॥ ७२ ॥

ततः श्रीकुंभभूपालः । प्रौढर्द्धीन् पुरुषान्निजान् ॥ आदिदेशेति दिव्यालं–कारराजिविराजितान् ॥७३॥

अर्थः—पछी ते कुंभराजाए विशाळ समृद्धिवाळा, तथा दिव्य आभूषणोनी श्रेणिथी शोभिता थयेला पोताना ते नोकरपुरुषोने एवी आज्ञा आपी के, ॥ ७३ ॥

भो भद्राकृतयो मर्त्या । वहंतु शिबिकामिमां ॥ पुण्यपुण्यार्थिनो यूयं । पापविध्वंसहेतवे ॥ ७४ ॥

अर्थः—हे सुंदर आकृतिवाळा पुरुषो तमो पवित्र पुण्यउपार्जन करवाना अर्थि छो, माटे पापोनो नाश करवामाटे आ पालखी उपाडो ? ॥ ७४ ॥

ततः प्रसन्नवक्त्रास्ते । सर्वे संजाततुष्टयः ॥ मुदोद्पाटयन्मर्त्या । अहं पूर्विकया च तां ॥ ७५ ॥

अर्थः—पछी प्रसन्न मुखवाळा, तथा मनमां आनंद पामेला ते सघळा पुरुषो हर्षवडे "हुं पेहेलां उपाडुं, हुं पेहेलां उपाडुं" एम कही ते पालखी उपाडवा लाग्या. ॥ ७५ ॥

ध्वनत्सु देवमानुष्य—वाद्येषु विगतांतरं ॥ नृत्यमानासु रंभासु । गायत्सु सुरबंदिषु ॥ ७६ ॥
मंगलेष्वष्टसु स्पष्टं । ढौकितेषु पुरः सुरैः ॥ कुर्वत्सु मंगलोच्चारान् । सकलेषु जनेषु च ॥ ७७ ॥
श्रीकुंभभूभुजा हस्त्या—रूढेन स्वजनैः समं ॥ सतंत्रया प्रभावत्या । स्वसुखासनसंस्थया ॥ ७८ ॥
सानंदं सेव्यमाना सा । शिबिका निजसौधतः ॥ पृथौ राजपथे याव—द्ययौकानि पदानि च ॥ ७९ ॥
विभ्राजिभूषणैर्वोढु—मारेभे शिबिका मुदा ॥ सुरेंद्रैरसुरेंद्रैश्च । तावदत्यादरोद्यतैः ॥८०॥ पंचभिःकुलकं॥

अर्थः—पछी अंतररहित देवोनां तथा मनुष्योनां वाजित्रो वागते छते, रंभानामनी आप्सरा नाचते छते, देवबंदिओ गाते छते, ॥ ७६ ॥ आगळ देवोवडे प्रगटरीते अष्टमंगलो मूकाते छते, तथा सर्वलोको मंगलीक शब्दो बोलते छते, ॥ ७७ ॥ स्व-

जनोसाहित हाथीपर बेठेला कुंभराजावडे, तथा पोताना परिवारसहित पोतानी पालखीमां बेठेली प्रभावतीराणीबडे, ॥ ७८ ॥ आनंदसहित सेवाती एवी ते प्रभुनी पालखी प्रभुना मेहेलथी विस्तीर्ण राजमार्गमां ज्यारे केटलांक पगलां आवी, ॥७९॥ त्यारे देदीप्यमान आभूषणोवाळा देवेंद्रोए तथा असुरेंद्रोए हर्षथी अति आदरमानपूर्वक ते पालखी उंचकवा मांडी. ॥८०॥ पंचभिःकुलकं॥

मिथिलापूर्नभः श्वेती-चक्रे देवैः स्वतेजसा ॥ तदा पुष्पाणि वर्षद्भि-र्नानानाट्य विशारदैः ॥ ८१ ॥

अर्थः—ते वखते पुष्पोनो वरसाद वरसावता, तथा विविध प्रकारनां नाटको करवामां विचक्षण, एवा देवोए पोताना तेजथी ते मिथिलानगरीना आकाशने उज्ज्वल करी दीधुं. ॥ ८१ ॥

पेपीयमानलावण्या । स्मेराभिर्नेत्रपंक्तिभिः ॥ लोकैरतीवसंतुष्टैः । श्रीमल्लिः शिबिकास्थिता ॥ ८२ ॥

पुरीमध्यमतिक्रम्या—गात्सहस्राम्रकाननं ॥ शिबिका सा स्थिता तत्र । ततोऽशोकतरोरधः ॥ ८३ ॥

अर्थः—अति आनंद पामेला लोकोनी विकस्वर नेत्रपंक्तिओवडे खूब पीवातुं छे लावण्य जेमनुं, एवा पालखीमां बेठेला ते श्रीमल्लिनाथप्रभु ॥ ८२ ॥ नगरीनो मध्यभाग ओळंगीने सहस्राम्रवनमां आव्या, अने त्यां अशोकवृक्षनी नीचे तेमनी ते पालखीने स्थापन करवामां आवी. ॥ ८३ ॥ युग्मं ॥

समुत्तीर्णा ततो मल्लिः । शिबिकायाः प्रयत्नतः ॥ शीलांगभूषणात्याक्षी-द्बाह्यभूषास्ततो विभुः ॥८४॥

अर्थः—पछी ते मल्लिनाथप्रभु धीमेथी ते पालखीमांथी नीचे उतर्या, अने पछी शीलरूपी शरीरना आभूषणवाळा ते प्रभुए बहारनां आभूषणो उतारी नाख्यां. ॥ ८४ ॥

स्वामिन्या विहिते लोचे । कचांस्तांस्त्रिदशाधिपः ॥ प्रावाहयद्रयाद्दुग्धो–दधौ लात्वा निजे पटे ॥ ८५ ॥

अर्थः—पछी प्रभुए लोच कर्याबाद इंद्रे ते केशोने पोताना वस्त्रमां लेइने तुरत क्षीरसमुद्रमां पधराव्या. ॥ ८५ ॥

शक्रवाक्येन वाद्यानां । तदानीमारवो महान् ॥ प्रशांतस्तुमुलश्चापि । नृसुरासुरसंभवः ॥ ८६ ॥

अर्थः—पछी ते समये इंद्रना वचनथी वाजित्रोनो महान ध्वनि शांत थयो, तेमज मनुष्यो, देवो अने दानवोनो कोलाहल पण शांत थयो. ॥ ८६ ।

नमः कृत्वाथ सिद्धेभ्यो । जैनीं दीक्षामशिश्रियत् ॥ सर्वसावद्ययोगानां । श्रीमल्लिस्त्यागपूर्वकं ॥ ८७ ॥

अर्थः-पछी ते श्रीमल्लिनाथप्रभुए सिद्धोने नमस्कार करीने सघळा सावद्य योगोना त्यागपूर्वक जैन दीक्षा ग्रहण करी. ॥८७॥

आविरासीतदैव श्री—मल्लेर्ज्ञानं चतुर्थकं ॥ श्रीमत्केवलभूपस्य । प्रतीहार इवागमे ॥ ८८ ॥

अर्थः—तेज वखते श्रीमान् केवलज्ञानरूपी राजाना आगमनने सूचवनारा प्रतीहारसरखुं चोथुं मनःपर्यवज्ञान ते श्रीमल्लिनाथप्रभुने उत्पन्न थयुं. ॥ ८८ ॥

चंद्रेऽश्विनीस्थे पौषस्य । विशदैकादशीतिथौ ॥ कृताष्टमतपा मल्लि—र्जग्राह व्रतमार्हतं ॥ ८९ ॥

अर्थः—अश्विनी नक्षत्रसाथे चंद्रनो योग होते छते पोषमासनी सुदी अगीयारसने दिवसे ते श्रीमल्लिनाथप्रभुए अट्ठमना तपपूर्वक भागवती दीक्षा ग्रहण करी. ॥ ८९ ॥

तदा त्रिभिः शतैरंतः। पर्षदा योषितामथ ॥ व्रतमात्तं नृणां बाह्य—पर्षदा च त्रिभिः शतैः ॥ ९० ॥

अर्थः—ते वखते त्रणसें स्त्रीओनी अंतरंग पर्षदाए, तथा त्रणसो पुरुषोनी बाह्य पर्षदाए चारित्र अंगीकार कर्युं. ॥ ९० ॥

बलमित्रः सुमित्रश्चा—नंदमित्रश्च नंदकः ॥ तथामरपतिर्भानु—मित्रोऽथामरसेनकः ॥ ९१ ॥
महासेनश्च विख्याता। अष्टावेते नृपांगजाः ॥ मल्लितीर्थकृता सार्धं। तदानीं प्राव्रजन् पुनः ॥ ९२ ॥

अर्थः—वळी ते वखते ते श्रीमल्लिनाथ तीर्थंकरनी साथे बलमित्र, सुमित्र, आनंदमित्र, नंदक, अमरपति, भानुमित्र, अमरसेन, अने माहसेननामना ते प्रख्यात आठ राजपुत्रोए पण दीक्षा लीधी. ॥ ९१ ॥ ९२ ॥ युग्मं ॥

विशुद्धध्यानयोगेना—पराह्णे व्रतवासरे ॥ उत्पेदे केवलज्ञानं। श्रीमल्लेरथ निर्मलं ॥ ९३ ॥

अर्थः—पछी ते श्रीमल्लीनाथप्रभुने निर्मल ध्यानना योगथी ते दिक्षाने दिवसेज पाछले पोहोरे केवलज्ञान उत्पन्न थयुं. ॥९३॥

समवसृतिं तत्कालं। स्वर्णरूप्यमणीमयीं ॥ चतुर्निकायगीर्वाणाः। प्रचक्रुर्भूरिभक्तितः ॥ ९४ ॥

अर्थः—पछी तेज वखते चारे निकायोना देवोए मळीने अतिभक्तिथी सुवर्ण, रुपुं, तथा मणिओनुं समवसरण रच्युं. ॥ ९४ ॥

श्रीमल्लितीर्थकृच्छक्र—विज्ञप्त्या प्राविशत्ततः ॥ पूर्वद्वारा ससमव—सृतेरंतः सुरैर्वृतः ॥ ९५ ॥

अर्थः—पछी ते श्रीमल्लिनाथ तीर्थंकर इंद्रनी विनंतिथी देवोवडे वींटायाथका पूर्वतरफना दरवाजेथी समवसरणनी अंदर दाखल थया. ॥ ९५ ॥

भेजे सिंहासनंनाना—विधरत्नैर्विनिर्मितं ॥ सहर्षं सपरीवारै—र्वासवैः समुपासितः ॥ ९६ ॥

अर्थः—पछी हर्षपूर्वक परिवारसहित इंद्रोवडे सेवायेला ते श्रीमल्लिनाथप्रभु विविधप्रकारनां रत्नोवडे बनावेलां सिंहासनपर बेठा.

उद्यानपालकस्तूर्ण—मागत्य मिथिलापुरि ॥ कुंभं विज्ञपयामास । केवलोत्पत्तिमर्हतः ॥ ९७ ॥

अर्थः—पछी उद्यानपालके तुरत मिथिलानगरीमां आवीने ते कुंभराजाने प्रभुना केवलज्ञाननी उत्पत्तिनुं स्वरूप निवेदित कर्युं.

दत्वा लक्षान् सुवर्णस्य । प्रीतिदानं प्रमोदभाक् ॥ गत्वा समवसरणं । सतंत्रः कुंभभूपतिः ॥ ९८ ॥

विधिनांतः प्रविशंश्च । मल्लिमानम्य भक्तितः ॥ न्यस्तचक्षुर्जिनमुखे । यथास्थानमुपाविशत् ॥ ९९ ॥

अर्थः—पछी ते कुंभराजा ते उद्यानपालकने लाखो सोनाम्होरोनुं प्रीतिदान आपीने, तथा परिवारसहित समवसरणमां जइने, ॥ ९८ ॥ विधिपूर्वक अंदर प्रवेश करीने, तथा भक्तिथी ते श्रीमल्लीनाथप्रभुने वांदीने, तेमना मुखतरफ दृष्टि राखीने योग्य स्थानके बेठा. ॥ ९९ ॥ युग्मं ॥

प्रतिबुध्याद्यस्तेऽपि । षड्भूमीपतयस्तदा ॥ तत्रायर्युर्भवोद्विग्ना—स्तूर्णं चारित्रकांक्षया ॥ १०० ॥

अर्थः—पछी मतिबुद्धिआदिक ते छए राजाओ पण तेज वखते संसारथी कंटाळयाथका चारित्र लेवानी इच्छाथी तुरत त्यां आवी पहोंच्या. ॥ १०० ॥

व्याख्यासद्म समागत्य । विधिनानम्य तीर्थपं ॥ उपाविशंस्ते श्रीकुंभ—पार्श्वे विकसिताननाः ॥ १ ॥

अर्थः—पछी तेओ समवसरणमां आवीने, तथा विधिपूर्वक प्रभुने नमीने विकस्वर मुखवाळा थयाथका कुंभराजानी पासे बेठा.

ततः पूर्णासु पर्षत्सु । पुण्यपीयूषवर्षिणीं ॥ परोपकृतये व्याख्या—मारेभे त्रिजगत्प्रभुः ॥ २ ॥

अर्थः—पछी(एरीते) सभा संपूर्ण भरायाबाद ते त्रणे जगतना स्वामी परोपकारमाटे पुण्यरूपी अमृतने वर्षनारी धर्मदेशना देवा लाग्या.

भव्यानां भववैराग्यं । मल्लीनाथगिरा तदा ॥ वर्धतेस्माब्दसद्वृष्टया । भूबीजांकुरवद्भृशं ॥ ३ ॥

अर्थः—ते वखते ते श्रीमल्लीनाथप्रभुनी वाणीथी उत्तमवृष्टिवडे पृथ्वीमां वावेलां बीजना अंकुरानीपेठे भव्यजनोनो संसारपरनो वैराग्य अत्यंत वृद्धि पामवा लाग्यो. ॥ ३ ॥

श्रुत्वा विशुद्धश्रद्धावान् । व्याख्यां तां कुंभभूपतिः ॥ प्रभावत्या समं देव्या । श्राद्धधर्ममशिश्रयत् ॥४॥

अर्थः—प्रभुनी ते देशना सांभळीने निर्मल श्रद्धावाळा ते कुंभराजाए प्रभावती राणीसहित श्रावकधर्मने अंगीकार कर्यो. ॥४॥

योजितांजलयस्तेऽपि । षण्महीशा जिनेश्वरं ॥ केवलज्ञानिनं विज्ञ—पयंतिस्मेति सादरं ॥ ५ ॥

अर्थः–पछी ते छए राजाओ हाथ जोडीने ते केवलज्ञानी जिनेश्वरप्रभुने आदरमानसहित एम विनंति करवा लाग्या के, ॥५॥

**संसारार्णवनिस्तार––कृते नौसंनिभां विभो ॥ दीक्षां प्रदाय नस्तूर्णं । नाथ तारय तारय ॥ ६ ॥**

अर्थः-हे प्रभु! हे स्वामी! आ संसाररूपी महासागरमांथी तारवामाटे वहाणसरखी दीक्षा अमोने आपीने आप तुरत तारो? तारो?

**यथा सुखं स्याद्भवतां । तथा कुरुत भो नृपाः ॥ इत्युक्ताश्चक्रिरेलोचं । ते विमुक्तांगभूषणाः ॥ ७ ॥**

अर्थः–हे राजाओ ! जेम आपने सुख उपजे तेम करो? एम प्रभुए कहेवाथी तेओए शरीरनां आभूषणो उतारीने केशोनो लोच कर्यो.

**गृहीतवेषाः श्रीमल्लि–मुखावाप्तमहाव्रताः ॥ साधुभ्यो द्विविधां शिक्षां । सम्यग् बुबुधिरेच ते ॥ ८ ॥**

अर्थः—पछी तेओ साधुवेष पेहेरीने, तथा श्रीमल्लीनाथप्रभुना मुखथी महाव्रत स्वीकारीने, साधुओपासेथी बन्ने प्रकारनी शिक्षाने सम्यक् प्रकारे जाणवा लाग्या. ॥ ८ ॥

**लघुकर्मतयान्येऽपि । तदा संवेगमागताः ॥ महाव्रतं जिनोपांते । प्रापद्यत शिवार्थिनः ॥ ९ ॥**

अर्थः—ते वखते लघुकर्मीपणाथी वैराग्य पामीने बीजा पण मोक्षार्थी मनुष्योए प्रभुपासे महाव्रत अंगीकार कर्या. ॥ ९ ॥

**प्रज्ञया पुरुषप्राप्त—रेखाः सर्वांगसुंदराः ॥ ततोऽष्टाविंशतिः साधु—नरा निर्मलबुद्धयः ॥ १० ॥**

**श्रीजिनेंद्रमुखात्प्राप्य । केवलां त्रिपदीं ततः ॥ द्वादशांगीं मुहूर्तांत—र्बबंधुस्ते महाशयाः ॥ ११ ॥**

अर्थः—पछी बुद्धिवडे करीने पुरुषोमां शिरोमणिसरखा, सर्वप्रकारे सुंदर शरीरोवाळा, अने निर्मल बुद्धिवाळा अठ्ठावीस उत्तम महाशय मुनिओए, ते श्रीजिनेश्वरप्रभुना मुखथी केवल त्रिपदी पामीने एक मुहूर्तनी अंदर द्वादशांगीनी (बारे अंगोनी) रचना करी.

निर्दूषणामथो मत्वा । द्वादशांगीं स्वसंविदा ॥ विभुना स्थापितास्तेऽथ । सोत्सवं गणभृत्पदे ॥ १२ ॥

अर्थः—पछी प्रभुए पोताना ज्ञानथी ते द्वादशांगीने दूषणरहित जाणीने तेओने महोत्सवपूर्वक गणधरोनी पदवीपर स्थापन कर्या.

श्रीमल्लिस्तत्र संस्थाप्य । तीर्थं संघं चतुर्विधं ॥ व्यहार्षीत् सपरीवार—स्ततः स्वामी महीतले ॥ १३ ॥

अर्थः—एरीते ते श्रीमल्लीनाथप्रभु त्यां चतुर्विध संघरूप तीर्थ स्थापीने त्यांथी परिवारसहित पृथ्वीतलपर विहार करवा लाग्या.

अन्ये राजर्षयः सर्वे । स्वप्रज्ञायोगतोऽखिलां ॥ द्वादशांगीं भवातंक—हरीं पेठुर्महत्तमाः ॥ १४ ॥

अर्थः—बीजा सघळा सघळा महान् राजर्षिओए पण पोताना बुद्धिबळथी संसाररूपी भयने हरनारी सर्व द्वादशांगीनो अभ्यास कर्यो.

पवित्रं चारु चारित्रं । चरित्वा ते मुनीश्वराः ॥ क्षपिताखिलकर्माण—स्तीव्रेण तपसा किल ॥ १५ ॥

केवलज्ञानमासाद्य । क्रमेण क्षपिताश्रवाः ॥ ययुः सिद्धिपुरीं सर्वे—दुःखच्छेदविधायिनः ॥१६॥ युग्मं ॥

अर्थः—वळी ते मुनिराजो पवित्र तथा उत्तम चारित्र पाळीने, अने खरेखर तीव्र तपवडे सर्व कर्मो खपावीने, ॥ १५ ॥ केवलज्ञान पामीने, तथा अनुक्रमे आश्रवोने पण खपावीने, अने सर्व प्रकारनां दुःखोनो नाश करीने मोक्षनगरीमां गया. ॥ १६ ॥

गृहे पंचशतं मल्लिः । केवलित्वे जगद्गुरुः ॥ वर्षाणि पंचपंचाशत् । सहस्रप्रमितान्यगुः ॥ १७ ॥

अर्थः—जगद्गुरु एवा आ श्रीमल्लीनाथप्रभु पांचसो वर्षो सुधी गृहस्थावासमां रह्या, तथा पंचावनहजार वर्षोसुधी तेमणे केवलिपर्याय पाळ्यो. ॥ १७ ॥

निर्वाणसमये स्वामी । समासन्ने समागते ॥ संमेतभूभृतिख्याते । सुतीर्थे समवासरत् ॥ १८ ॥

अर्थः—मोक्षनो समय नजीक आव्येथी ते श्रीमल्लीनाथप्रभु प्रख्यात, तथा उत्तम तीर्थरूप एवा, श्रीसम्मेत शिखरनामना पर्वतपर आवीने समोसर्या. ॥ १८ ॥

प्रपद्यानशनं मासं । यावदाखंडलानतः ॥ सार्धं श्रमणसाध्वीनां । प्रत्येकं पंचभिः शतैः ॥ १९ ॥

शुक्ले चतुर्थी दिवसे । चैत्रस्य भरणीस्थिते ॥ निशाकरे स्थिरवपुः । कायोत्सर्गे जगद्गुरुः ॥ २० ॥

संहृत्य सर्वकर्माणि । शैलेशीकरणादथ ॥ अनंतदर्शनज्ञाना—नंतवीर्यं शिवं ययौ ॥२१॥ त्रिभिर्विशेषकं॥

अर्थः—इंद्रोवडे नमायेला ते प्रभु त्यां एकमासनुं अनशन करीने साधुसाध्वीओना दरेकना पांचसोना परिवारसहित, ॥१९॥ चैतरसुदी चोथने दिवसे, भरणीनक्षत्रसाथे चंद्रनो योग थये छते, कायोत्सर्गमां स्थिर शरीरवाळा थइने, । २० ॥ शैलेशीकरणथी सर्व कर्मोने संहरीने अनंत दर्शन, अनंत ज्ञान, अने अनंत वीर्यवाळा मोक्षनगरमां पधार्या. ॥ २१ ॥ त्रिभिर्विशेषकं ॥

श्रीमल्लेः शुद्धचारित्र—पवित्राणां तपोभृतां ॥ चत्वारिंशत्सहस्राणि । जज्ञिरे सर्वसंख्यया ॥ २२ ॥

अर्थः—आ श्रीमल्लीनाथप्रभुना परिवारमां शुद्ध चारित्रवडे पवित्र थयेला सर्व मळीने चालीसहजार साधुओ हता. ॥ २२ ॥

साध्व्यो बंधुमतीमुख्याः । संयमाराधनोद्यताः ॥ क्रियाश्रयाः सहस्राणि । पंचपंचाशदर्हतः ॥ २३ ॥

अर्थः—वळी आ प्रभुना परिवारमां संयमना आराधनमां उद्यमवंत थयेली, तथा क्रियापात्र बंधुमतीआदिक पचावनहजार साध्वीओ हती. ॥ २३ ॥

चतुरभ्यधिकाशीति—सहस्राभ्यधिकं तथा ॥ लक्षमेकं जिनेंद्राज्ञा—राधकाः श्रावकोत्तमाः ॥ २४ ॥

अर्थः—वळी आ प्रभुनी आज्ञाने आराधवावाळा एकलाख चोर्यासी हजार उत्तम श्रावको हता. ॥ २४ ॥

लक्षत्रयं श्राविकाणां । पंचषष्टिसहस्रयुक् ॥ तथा शतानि जातानि । षट् चतुर्दशपूर्विणां ॥ २५ ॥

अर्थः—वळी त्रण लाख पांसठ हजार श्राविकाओ हती, अने छसो चौदपूर्वधारी साधुओ हता. ॥ २५ ॥

शतानि विंशतिर्मल्ले—रवधिज्ञानिनां तथा ॥ केवलज्ञानिसाधूनां । षड्विंशच्च शतान्यहो ॥ २६ ॥

अर्थः—वळी आ श्रीमल्लीनाथप्रभुना परिवारमां बेहजार अवधिज्ञानी साधुओ, अने त्रणहजार छसो केवलज्ञानीसाधुओ हता.

वैक्रियार्द्धिजुषः पंच—त्रिंशच्छतमिता मताः ॥ मनःपर्यववत्साधु—वरा अष्टशतीमिताः ॥ २७ ॥

अर्थः—वळी त्रणहजार पांचसो साधुओ वैक्रियलब्धिवाळा हता, तेमज आठसो मनपर्यवज्ञानी साधुओ हता. ॥ २७ ॥

**वादलब्धिमतां नेतु——श्चतुर्दश शतानि च ॥ शतानि विंशतिरनु——त्तरलब्धिमतां सतां ॥ २८ ॥**

अर्थः—वळी ते प्रभुना परिवारमां चौदसो साधुओ वादनी लब्धिवाळा हता, अने बेहजार अनुत्तर लब्धिवाळा हता. ॥२८॥

**श्रीमल्लेर्द्विविधाप्यंत——कृद्भूमिरवबुध्यतां ॥ एका युगांतकृद्भूमिः । पर्यायांतकरी तथा ॥ २९ ॥**

अर्थः—वळी ते श्रीमल्लीनाथप्रभुनी बे प्रकारनी अंतकृत् भूमि जाणवी, एक युगांतकृत् भूमि, अने बीजी पर्यायांतकृत भूमि जाणवी.

**देहप्रभानिर्जितमंडलेंद्र——नीलच्छविः कामदवाग्निवार्दः ॥**
**एकोनविंशः शिवसंपदेऽथ । श्रीमल्लिरर्हन् भवताद्धीशः ॥ ३० ॥**

अर्थः—शरीरनी कांतिवडे जीतेल छे गोळ इंद्रनीलमणिनी कांति जेणे, तथा कामरूपी दावानलने बूझाववामां मेघसरखा, एवा ते एकवीसमा तीर्थंकर श्रीमल्लिनाथप्रभु मोक्षलक्ष्मीमाटे थाओ ? ॥ ३० ॥

**एवं मल्लिजिनास्यनिर्गतवचःपीयूषपानाद्भृशं ॥ प्रीताः स्फीतगुणोत्करा गणधराः संवेगरंगास्तथा ॥**
**भेजुः षण्नृपसाधवः श्रुतधराः सन्मुक्तिमार्गं यथा । संसेव्यो भवपारगामिभिरयं मार्गः सुधीभिस्तथा ॥३१॥**

अर्थः—एवीरीते श्रीमल्लिनाथप्रभुना मुखमांथी निकळेलां वचनरूपी अमृतना पानथी अत्यंत खुशी थयेला, विस्तीर्ण गुणोना

समूहवाळा, साधुसमुदायने धारण करनारा, वैराग्यना रंगवाळा, तथा आगमोना पारंगामी एवा ते छए राजाओरूपी मुनिओए जेम उत्तम मोक्षमार्गने धारण कर्यो, तेम संसारनो पार पामवानी इच्छावाळा उत्तम बुद्धिवाळा मनुष्योए आ मोक्षमार्गने सेववो.

॥ इति श्रीमल्लिनाथचरित्रे चतुर्थः सर्गः समाप्तः ॥

॥ समाप्तोऽयं ग्रंथः गुरुश्रीमच्चारित्रविजयसुप्रसादात् ॥

॥ आ ग्रंथ श्रीशुभवर्धनगणिजीए रचेली ऋषिमंडलनामनी टीकामांथी ओधरी तेनुं भाषांतर जामनगर निवासी पंडित श्रावक हीरालाल हंसराजे करी स्वपरना श्रेयने माटे पोताना श्रीजैनभास्करोदय प्रेसमां छापी प्रसिद्ध करेल छे ॥ श्रीरस्तु ॥

नोटः–आ ग्रंथनुं मूळ पण छापेल छे तेनी कींमत रु. १–४–० छे.

॥ इति श्रीमल्लिनाथचरित्रं समाप्तम् ॥